मै० दुर्गा सप्तशती



कृष्णदास अकादमी, वाराणसी

92
JACL-KRC
013392

योऽनूचान स नो महान्
राष्ट्रिय संस्कृत संस्थान

राष्ट्रिय संस्कृत संस्थान, जयपुर परिसर

पुस्तकालय

पुस्तक संख्या ....

वर्गीकरण संख्या ....

12392

राष्ट्रिय संस्कृत संस्थान, जयपुर
परिसर

वर्गीकरण सं. ....

पुस्तक सं. 13392 दिनाङ्क ....

यह पुस्तक नीचे अङ्कित तिथि या उससे पूर्व लौटा दी जानी चाहिये। यदि पुस्तक निर्धारित तिथि से अधिक समय तक पाठक अपने पास रखेंगे तो 50 पैसे प्रतिदिन के हिसाब से विलम्ब शुल्क देय होगा।

किशोर ग्रन्थमाला—४२

मैथिलसाम्प्रदायिक-

दुर्गासप्तशती

दुर्गासप्तशतीपाठसमीक्षासहित 'इन्दुमती' परिशिष्टविभूषिता

सम्पादकः

श्री पं० रामचन्द्र झा व्याकरणाचार्यः

(एकाशीति (८१) वर्षवयस्कः)

संशोधकः

श्री प्रदीप झा 'सुमन' एम. ए.

(सम्पादकस्यात्मजः)

कृष्णदास अकादमी·वाराणसी

FORWARDED FREE OF COST WITH THE COMPLIMENTS OF RASHTRIYA SANSKRIT SANSTHAN, NEW DELHI.

राष्ट्रिय संस्कृत संस्थान
जयपुर परिसर, जयपुर
पुस्तकालय
क्रमांक 13392

प्रकाशक : कृष्णदास अकादमी, वाराणसी

मुद्रक : चौखम्बा प्रेस, वाराणसी

संस्करण : प्रथम, वि० सं० २०४७, ई० १९९०

मूल्य : रु० १०–००

© कृष्णदास अकादमी

पो० बा० नं० ११**१**८

चौक, (चित्रा सिनेमा बिल्डिंग) वाराणसी–२२१००१

(भारत)

फोन : ६२१५०

JACL-KRC

013392

अपरं च प्राप्तिस्थानम्

चौखम्बा संस्कृत सीरीज आफिस

के० ३७/९९, गोपालमन्दिर लेन

पो० बा० १००८, वाराणसी, २२१००१

फोन : ६३१४५

दुर्गासप्तशतीपाठसमीक्षा

चण्डीपाठप्रकारः—अर्गलं कीलकं चादौ जपित्वा कवचं पठेत्।
जपेत् सप्तशतीं पश्चात् क्रम एष शिवोदितः ॥ (मा. पु.)

चण्डीपाठमाहात्म्यम्—

वाराहीतन्त्रे—चण्डीपाठफलं देवि शृणुष्व गदतो मम। ग्रहोपशान्त्यै कर्तव्यं पञ्चावृत्तं वरानने ॥ महाभये समुत्पन्ने सप्तावृत्तमुदीरयेत्। अर्कावृत्तेः काम्यसिद्धिः वैरिहानिश्च जायते ॥ मन्त्रावृत्त्या रिपुर्वश्यस्तथा स्त्री वश्यतामियात्। सौख्यं पञ्चदशावृत्ताच्छ्रियमाप्नोति मानवः ॥ कलावृत्तात् पुत्रपौत्रधनधान्यादिकं विदुः। राज्ञां भीतिविमोक्षाय वैरस्योच्चाटनाय च ॥ कुर्यात् सप्तदशावृत्तं तथाऽष्टादशकं प्रिये। महात्राणविमोक्षाय विंशावृत्तं पठेन्नरः ॥ पञ्चविंशावर्त्तनाच्च भवेद् बन्धविमोक्षणम्। सङ्कटे समनुप्राप्ते दुश्चिकित्सामये तथा ॥ जातिध्वंसे कुलच्छेदे आयुषो नाश आगते। वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ॥ तथैव त्रिविधोत्पाते तथा चैवातिपातके। कुर्याद्यत्नाच्छतावृत्तं ततः सम्पद्यते शुभम् ॥ श्रियो वृद्धिश्शतावृत्तादायुर्वृद्धिस्तथा प्रिये। मनसा चिन्तितं देवि सिद्धयेदष्टोत्तराच्छतात् ॥ शताश्वमेधयज्ञानां फल-

माप्नोति सुव्रते । सहस्रावर्त्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा ॥ भुक्त्वा मनोरथान् सर्वान् नरो मोक्षमवाप्नुयात् । यथाश्वमेधः क्रतुराड् देवानां च यथा हरिः ॥ स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः । अथवा बहुनोक्तेन किमेतेन वरानने ॥ चण्ड्याः शतावृत्तिपाठात् सर्वाः सिद्ध्यन्ति सिद्धयः ॥ (शतचण्डीविधिः ११९ पृष्ठे द्रष्टव्यः)

चण्डीपाठविधिः

वाराहीतन्त्रे—न मानसं पठेत् स्तोत्रं वाचिकं तु प्रशस्यते। पुस्तके वाचनं शस्तं सहस्रादधिकं यदि ॥ ततो न्यूनस्य तु भवेद्वाचनं पुस्तकं विना । सकामैः सम्पुटो जाप्यो निष्कामैः सम्पुटं विना ॥ चरितं मध्यमं चैव जपेद्वा चण्डिकाद्वयम् । एकेन वा मध्यमेन नैकेनेतरयोरिह ॥ चरितार्धं न तु जपेज्जपेच्छिद्रमवाप्नुयात् । यावन्न पूर्यतेऽध्यायस्तावन्न विरमेत् सुधीः ॥ यदि प्रमादादध्याये विरामो भवति प्रिये । पुनरध्यायमारभ्य पठेत् सर्वमुदारधीः ॥ आधारे स्थापयित्वा तु पुस्तकं वाचयेत् सुधीः । हस्ते संस्थापनाद् देवि हन्त्यर्धं हि फलं यतः ॥

शिक्षायां—गीती शीघ्री शिरःकम्पी तथा (स्व) लिखितपाठकः । अनर्थज्ञोऽल्प-
कण्ठश्च षडेते पाठकाऽधमाः ॥ १ ॥ माधुर्यमक्षरव्यक्तिः पदच्छेऽस्तु सुस्वरः । धैर्यं लयसमर्थश्च षडेते पाठका गुणाः ॥ २ ॥

कुलार्णवतन्त्रे—मनसा यः पठेत् स्तोत्रं वचसा वा मनुं (मंत्रं) जपेत् ।
उभयं निष्फलं देवि ! भिन्न (छिन्न) भाण्डोदकं यथा ॥

स्वकर्तृकदुर्गासप्तशतीपाठसंकल्प.—

ॐ अद्य आश्विने मासि शुक्ले पक्षे प्रतिपत्तिथौ अमुकगोत्रस्य मम श्री अमुकशर्मणः सकलदुष्कृतिनिवृत्ति-दुष्कृतोत्थसमस्तापच्छून्यत्व-मनोऽभीप्सितसिद्धि-दीर्घायुष्य-राजप्रासादपूर्वक-सर्वविध-सौमनस्य-सदाविजयकामोऽद्यारभ्य-नवमीपर्यन्तं मार्कण्डेयपुराणान्तर्गत—'मार्कण्डेय उवाच—सावर्णिः सूर्यतनय' इत्यारभ्य 'सावर्णिर्भविता मनुः' इत्यन्तं देवीमाहात्म्यपाठमहं करिष्ये ।

परकर्तृकदुर्गासप्तशतीपाठसंकल्पः—

ॐ अद्य आश्विने मासि शुक्ले पक्षे प्रतिपत्तिथौ अमुकगोत्रस्य मम श्री अमुकशर्मणः सपरिवारस्य सर्वबाधा-प्रशमन-सकलदुष्कृत-निवृत्ति-दुष्कृतोत्थसमस्तापच्छून्यत्व-दारिद्र्यानुत्पत्तीष्टवियोगराहित्यसार्वदिक-शत्रु – दस्युराजशस्त्रा-ऽनल - तोयौघहेतुक-भयाभाव-महामारीसमुद्भवा-ऽशेषोपसर्ग - त्रिविधोत्पातशमन-सतत - श्रीदुर्गासान्निध्य-धनधान्यसुतान्वितत्व-सदा पराक्रमनिर्भयत्वभवन-सकलरिपुक्षयकल्याणोत्पत्ति-स्वकुलानन्द-दारुणग्रहपीडाशान्ति-दुःस्वप्नसुस्वप्नोत्पत्ति-नृसंघातभेद-मैत्रीकरणा-ऽशेषदु-

वृत्तान्तिक-बहलानि-रक्षोभूत-पिशाचनाशनारोग्यशुभमतित्व-सर्वसंकट-विमुक्ति-स्वाव-धिकहिंसादि-दस्युवैरिदूरपलायनकामोऽद्यारभ्य नवमीपर्यन्तं श्रीमार्कण्डेयपुराणान्तर्गत-'मार्कण्डेय उवाच—सावर्णिः सूर्यतनय' इत्यादि 'सावर्णिर्भविता मनुः' इत्यन्तं देवीमाहात्म्यं ब्राह्मणद्वाराऽहं पाठयिष्ये ।

बलिदानम्

वैष्णवास्त्वत्र कूष्माण्डबलिदानं कुर्वन्ति । शाक्तास्तु सप्तमाऽध्यायोक्त-'नरमालाविभूषणां' दुर्गां संस्मृत्य 'पशु (छाग) पुष्पार्घधूपैश्चेति सम्पूज्य छागबलिदानं कुर्वन्ति, तन्मांसं प्रसादरूपेण खादन्ति च ।

तदाह मनुः—देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दोषभाक् ॥

अन्यच्च—न मांसभक्षणे दोषः नच मद्ये नच मैथुने ।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥ इति ।

" प्रवृत्तिरेषा भूतानाम् " इत्युक्तत्वात् मांसभक्षणे न दोषः इति भावः ।

विमर्शः—यज्ञादन्यत्र (उपनयनादिसंस्कारे) छागबलिदाने—

ॐ यज्ञार्थे पशवः सृष्टा यज्ञार्थे पशुघातनम् । अतः त्वां घातयिष्यामि तस्माद् यज्ञे वधोऽवधः ॥ इति मन्त्रो न पठनीयः, इति तत्त्वविदः ।

पाठान्तरम्

मैथिलसाम्प्रदायिकपुस्तके—

बलिनां तद् बलं सर्वमसुराणां 'महात्मनाम्' (अ. ७ श्लो. १४)

इति पाठो दृश्यते । काशीप्रकाशितपुस्तकेषु 'महात्मनाम्' इत्यत्र 'दुरात्मनाम्' इत्येव पाठः उपलभ्यते अत्र तज्ज्ञास्तु 'दुरात्मनाम्' इत्येव पाठः समीचीन इत्याहुः, यतः पुस्तकेऽस्मिन्—'दुरात्मन्' तिष्ठ तिष्ठेति तथा हते तस्मिन् 'दुरात्मनि' । इत्यादयो बहवः प्रयोगाः दृश्यन्ते ॥ इति ॥

विद्वच्चरणचञ्चरीकः
पं० रामचन्द्रझा व्याकरणाचार्यः
एकाशीति (८१) वर्षवयस्कः

पं० बलदेव झा संस्थापित
जयमंगलाभवन, धर्मकूप,
वाराणसी—१

विषय-प्रवेशः

विषयाः	पृष्ठांकाः
दुर्गासप्तशतीपाठसमीक्षा	१–५
अर्गलास्तोत्रम्	१
कीलकम्	६
कवचम्	९
दुर्गाशापोद्धारः	१७
दुर्गाशतनामस्तोत्रम्	२०
(१) प्रथमोऽध्यायः	२४
(२) द्वितीयोऽध्यायः	३५
(३) तृतीयोऽध्यायः	४४
(४) चतुर्थोऽध्यायः	५०
(५) पञ्चमोऽध्यायः	५७
(६) षष्ठोऽध्यायः	६८
(७) सप्तमोऽध्यायः	७१
(८) अष्टमोऽध्यायः	७५
(९) नवमोऽध्यायः	८३

विषयाः	पृष्ठांकाः
(१०) दशमोऽध्यायः	८८
(११) एकादशोऽध्यायः	९२
(१२) द्वादशोऽध्यायः	१००
(१३) त्रयोदशोऽध्यायः	१०५
देवीसूक्तम्	१०८
इन्दुमती-परिशिष्टम्	
सिद्धकुञ्जिका स्तोत्रम्	११०
दुर्गादलम्	११२
दुर्गा-हृदयम्	११४
कात्यायनीतंत्रोक्तानि-प्रयोगान्तराणि	११६
शतचण्डी विधिः	११९
सप्तश्लोकी दुर्गा	१२०
पूर्वस्थापित-सर्वदेवीषोडशोपचारपूजन-विधिः	१११
देव्यपराधक्षमापनस्तोत्रम्	१२६
छागबलिदानविधिः	१२७

अथ अर्गलास्तोत्रम्[1]

ॐ नमश्चण्डिकायै

मार्कण्डेय उवाच—ब्रह्मन् केन प्रकारेण दुर्गामाहात्म्य-मुत्तमम् । शीघ्रं सिद्ध्यति तत्सर्वं कथयस्व महामते ॥ १ ॥ ब्रह्मोवाच—अर्गलं कीलकं चादौ जपित्वा कवचं पठेत् । जपेत् सप्तशतीं पश्चात् क्रम एष शिवोदितः ॥ २ ॥ अर्गलं दुरितं हन्ति कीलकं फलदं भवेत् । कवचं रक्षते नित्यं चण्डिका-त्रितयं तथा ॥ ३ ॥ अर्गलं हृदये यस्य तथाऽनर्गलवागसौ । भविष्यतीति निश्चित्य शिवेन कथितं पुरा ॥४॥ कीलकं हृदये यस्य स कीलित-मनोरथः । भविष्यति न सन्देहो नाऽन्यथा शिवभाषितम् ॥ ५ ॥ कवचं हृदये यस्य स वज्रकवचः

---

१. 'अर्गलं कीलकं चादौ जपित्वा कवचं पठेत् । जपेत् (पठेत्) सप्तशतीं पश्चात् क्रम एष शिवोदितः ॥' दुर्गापाठारम्भे इदं न विस्मर्तव्यम् ।

खलु । भविष्यतीति निश्चित्य ब्रह्मणा निर्मितं पुरा ॥ ६ ॥
मार्कण्डेय उवाच—जय त्वन्देवि चामुण्डे जय भूतान्तकारिणि ।
जय सर्वंगते देवि कालरात्रि नमोऽस्तु ते ॥ ७ ॥ जयन्ती मङ्गला
काली भद्रकाली कपालिनी । दुर्गा क्षमा शिवा धात्री स्वधा स्वाहा
नमोऽस्तु ते ॥ ८ ॥ मधुकैटभ–विद्राव–विधात्रि वरदे नमः ।
रूपन्देहि जयन्देहि यशो देहि द्विषो जहि ॥ ९ ॥ महिषासुर-
सैन्यान्त–विधात्रि वरदे नमः । रूपन्देहि जयन्देहि यशो देहि
द्विषो जहि ॥ १० ॥ महिषासुर-निर्णाश-विधात्रि वरदे नमः ।
रूपन्देहि जयन्देहि यशो देहि द्विषो जहि ॥ ११ ॥ धूम्रलोचन-
दर्पान्त-विधात्रि वरदे नमः । रूपन्देहि जयन्देहि यशो देहि द्विषो
जहि ॥ १२ ॥ चण्डमुण्ड-प्रमथन-विधात्रि वरदे नमः । रूपन्देहि
जयन्देहि यशो देहि द्विषो जहि ॥ १३ ॥ रक्तबीज-कुलोच्छेद-

विधात्रि वरदे नमः। रूपन्देहि जयन्देहि यशो देहि द्विषो जहि॥ १४॥ निशुम्भप्राण-संहार-विधात्रि वरदे नमः। रूपन्देहि जयन्देहि यशो देहि द्विषो जहि॥ १५॥ शुम्भराक्षस-संहार-विधात्रि वरदे नमः। रूपन्देहि जयन्देहि यशो देहि द्विषो जहि॥ १६॥ वन्दिताङ्घ्रियुगे श्रीदे देवि सौभाग्यदायिनि। रूपन्देहि जयन्देहि यशो देहि द्विषो जहि॥ १७॥ अचिन्त्य-रूपचरिते सर्वशत्रु-विनाशिनि। रूपन्देहि जयन्देहि यशो देहि द्विषो जहि॥ १८॥ देहि सौभाग्य-मारोग्यं देहि देवि परं सुखम्। रूपन्देहि जयन्देहि यशो देहि द्विषो जहि॥ १९॥ विधेहि द्विषतान्नाशं विधेहि बलमुच्चकैः। रूपन्देहि जयन्देहि यशो देहि द्विषो जहि॥ २०॥ विधेहि देवि कल्याणं विधेहि विपुलां श्रियम्। रूपन्देहि जयन्देहि यशो देहि द्विषो जहि॥ २१॥

देवि प्रचण्ड-दोर्दण्ड-दैत्यदर्प-विनाशिनि । रूपन्देहि जयन्देहि यशो देहि द्विषो जहि ॥ २२ ॥ देवि भक्तजनोद्दाम-दत्तानन्दोदयेऽम्बिके । रूपन्देहि जयन्देहि यशो देहि द्विषो जहि ॥ २३ ॥ न तेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे । रूपन्देहि जयन्देहि यशो देहि द्विषो जहि ॥ २४ ॥ स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधि-नाशिनि । रूपन्देहि जयन्देहि यशो देहि द्विषो जहि ॥ २५ ॥ चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः । रूपन्देहि जयन्देहि यशो देहि द्विषो जहि ॥ २६ ॥ सुराऽसुर-शिरोरत्न–निघृष्ट–चरणाऽम्बुजे । रूपन्देहि जयन्देहि यशो देहि द्विषो जहि ॥ २७ ॥ विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु । रूपन्देहि जयन्देहि यशो देहि द्विषो जहि ॥ २८ ॥ प्रचण्ड-दैत्य-दर्पघ्नि चण्डिके प्रणता वयम् । रूपन्देहि जयन्देहि यशो देहि द्विषो जहि ॥ २९ ॥

चतुर्भुजे चतुर्वक्त्र-संस्तुते परमेश्वरि । रूपन्देहि जयन्देहि यशो
देहि द्विषो जहि ॥ ३० ॥ कृष्णेन संस्तुते देवि सश्वद्भक्त्या
सदाऽम्बिके । रूपन्देहि जयन्देहि यशो देहि द्विषो जहि ॥ ३१ ॥
हिमाचल-सुतानाथ-संस्तुते परमेश्वरि । रूपन्देहि जयन्देहि यशो
देहि द्विषो जहि ॥ ३२ ॥ इन्द्राणीपति-सद्भाव-पूजिते परमेश्वरि ।
रूपन्देहि जयन्देहि यशो देहि द्विषो जहि ॥ ३३ ॥ पत्नीं
मनोरमां देहि मनोवृत्ताऽनुसारिणीम् । तारिणीं दुर्गसंसार-सागरस्य
कुलोद्भवाम् ॥ ३४ ॥ इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ।
स तु सप्तशतीसंख्या-वरमाप्नोति सम्पदः ॥ ३५ ॥ अर्गलं पाप-
जातस्य दारिद्र्यस्य तथाऽर्गलम् । इदमादौ पठित्वा तु पश्चात्
श्रीचण्डिकां पठेत् ॥ ३६ ॥

इति श्रीमार्कण्डेय-पुराणान्तर्गतम्-अर्गलास्तोत्रम् !

अथ कीलकम्

मार्कण्डेय उवाच–विशुद्ध-ज्ञान-देहाय त्रिवेदी–दिव्यचक्षुषे। श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥ १ ॥ सर्वदैव पठेद् यस्तु मन्त्राणामपि कीलकम्। सोऽपि क्षेम-मवाप्नोति सततं जपतत्परः ॥ २ ॥ सिद्ध्यन्त्युच्चाट-नादीनि वस्तूनि सकलान्यपि। एतेन स्तुवतां देवी-स्तोत्र-वृन्देन सिद्ध्यति ॥ ३ ॥ न मंत्रो नौषधं तत्र न किञ्चिदपि विद्यते। विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम् ॥ ४ ॥ समग्राण्यपि सेत्स्यन्ति लोके शङ्कामिमां हरः। कृत्वा निमंत्रयामास सर्वमेवमिदं शुभम् ॥ ५ ॥ स्तोत्रं वै चण्डिकायास्तु तच्च गुप्तं चकार सः। समाप्नोति सुपुण्येन तां यथाव-न्नियन्त्रणाम् ॥ ६ ॥ सोऽपि क्षेममवाप्नोति सर्वमेतन्न संशयः। कृष्णायां वा चतुर्दश्या-मष्टम्यां

वा समाहितः ॥ ७ ॥ ददाति प्रतिगृह्णाति नान्यथैषा प्रसिद्धयति । इत्थंरूपेण कीलेन महादेवेन कीलितम् ॥ ८ ॥ स एव क्षेममाप्नोति सदा जप्त्वा न संशयः । यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम् ॥ ९ ॥ स सिद्धः सगणः सोऽपि गन्धर्वो जायते नरः । न चैवाऽप्यटतस्तस्य भयं क्वापि हि जायते ॥ १० ॥ नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् । ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति ॥ ११ ॥ ततो ज्ञात्वैव सम्पन्न-मिदं प्रारभ्यते जनैः । सौभाग्यादि च यत् कञ्चिद् दृश्यते ललनाजने ॥ १२ ॥ तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम् । शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः ॥ १३ ॥ भवत्येव समग्राऽपि ततः प्रारभ्यमेव तत् । ऐश्वर्यं तत्प्रसादेन सौभाग्याऽऽरोग्य-सम्पदः ॥ १४ ॥ शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः । प्रथमं पठते देव्या ह्यग्रे

भूत्वा शुचिस्तथा ॥ १५ ॥ कीलकेयं समाख्याता पश्चात् सप्तशती-
स्तुतिः । निष्कीलकं ततः कृत्वा ख्याता निष्कील-कारणात् ॥
देव्याश्चैव महाभक्त्या तेनाऽभीष्टफला भवेत् ॥ १६ ॥

य: स्तोत्रमेतदनुवासर-मम्बिकाया:
श्रेयस्करं पठति वा यदि वा शृणोति ।
सद्यैहिकं फलमवाप्य विराजतेऽसौ
जायेत स प्रियतमो मदिरेक्षणानाम् ॥१७॥

इति श्रीमार्कण्डेयपुराणान्तर्गत-कीलकस्तोत्रम् ।

अथ कवचम्

मार्कण्डेय उवाच–यद् गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥ १ ॥

ब्रह्मोवाच–अस्ति गुह्यतमं विप्र सर्वभूतोप-कारकम् । देव्यास्तु
कवचं पुण्यं तच्छृणुष्व महामुने ॥ २ ॥ प्रथमं शैलपुत्री च द्वितीयं
ब्रह्मचारिणी । तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् ॥ ३ ॥
पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च । सप्तमं कालरात्री च
महागौरीति चाष्टमम् ॥ ४ ॥ नवमं सिद्धिदात्री च नवदुर्गाः
प्रकीर्तिताः । उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥ ५ ॥
अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे । विषमे दुर्गमे वाऽपि
भयार्त्ताः शरणं गताः ॥ ६ । न तेषां जायते किञ्चि-दशुभं

रणसंकटे । नापदं तस्य पश्यामि शोक-दुःख-भयन्न हि ॥ ७ ॥
दे० यैस्तु भक्त्या स्मृता नूनं तेषां सिद्धिः प्रजायते । प्रेतसंस्था तु क०
चामुण्डा वाराही महिषासना ॥ ८ ॥ ऐन्द्री गज-समारूढा वैष्णवी
गरुडासना । माहेश्वरी वृषारूढा कौमारी शिखिवाहना ॥ ९ ॥
ब्राह्मी हंस-समारूढा सर्वाभरण-भूषिता । लक्ष्मीः पद्मासना देवी
पद्महस्ता हरिप्रिया ॥ १० ॥ श्वेतरूपधरा देवी ईश्वरी वृषवाहना ।
इत्येता मातरः सर्वाः सर्वयोग-समन्विताः ॥ ११ ॥ श्रेष्ठैश्च मौक्तिकैः
सर्वा दिव्य-हार-प्रलम्बिभिः । इन्द्रनीलैर्महानीलैः पद्मरागैः
सुशोभितैः ॥ १२ ॥ नाना-भरण-शोभाढ्या नाना-रत्नोपशोभिताः ।
दृश्यन्ते रथमारुढा देव्यः क्रोध-समाकुलाः ॥ १३ ॥ शंखं चक्रं १०
गदां शक्तिं, हलं च मुसलायुधम् । खेटकं तोमरं चैव परशुं
पाशमेव च ॥ १४ ॥ कुन्तायुधं च खड्गं च शार्ङ्गमायुध-मुत्तमम् ।

कुलिशं च त्रिशूलं च पट्टिशं मुद्गरं तथा ॥ १५ ॥ दैत्यानां देह-नाशाय भक्ताना-मभयाय च । धारयन्त्याऽऽयुधानीत्थं देवानां तु हिताय वै ॥ १६ ॥ नमस्तेऽस्तु महारौद्रे महाघोर-पराक्रमे । महाबले महाकाये महाभय-विनाशिनि ॥ १७ ॥ त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्द्धिनि । प्राच्यां रक्षतु मामैन्द्री आग्नेय्या-मग्निदेवता ॥ १८ ॥ याम्यां रक्षतु वाराही नैर्ऋत्यां खड्ग-धारिणी । प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी ॥ १९ ॥ उदीच्यां रक्षतु कौमारी ऐशान्यां शूलधारिणी । ऊर्ध्वं ब्राह्मी च मे रक्षे-दधस्ताद् वैष्णवी तथा ॥ २० ॥ एवं दश-दिशो रक्षे-च्चामुण्डा शव-वाहना । जया मे चाग्रतः पातु विजया पातु पृष्ठतः ॥ २१ ॥
अजिता वाम-पार्श्वे तु दक्षिणे चाऽपराजिता । शिखामुद्योतिनी रक्षे-दुमा मूर्ध्नि व्यवस्थिता ॥२२॥ मालाधरी ललाटे तु भ्रुवोर्मध्ये

रणसंकटे । नापदं तस्य पश्यामि शोक-दुःख-भयन्न हि ॥ ७ ॥
येस्तु भक्तया स्मृता नूनं तेषां सिद्धिः प्रजायते । प्रेतसंस्था तु
चामुण्डा वाराही महिषासना ॥ ८ ॥ ऐन्द्री गज-समारूढा वैष्णवी
गरुडासना । माहेश्वरी वृषारूढा कौमारी शिखिवाहना ॥ ९ ॥
ब्राह्मी हंस-समारूढा सर्वाभरण-भूषिता । लक्ष्मीः पद्मासना देवी
पद्महस्ता हरिप्रिया ॥ १० ॥ श्वेतरूपधरा देवी ईश्वरी वृषवाहना ।
इत्येता मातरः सर्वाः सर्वयोग-समन्विताः ॥ ११ ॥ श्रेष्ठैश्च मौक्तिकैः
सर्वा दिव्य-हार-प्रलम्बिभिः । इन्द्रनीलै-र्महानीलैः पद्मरागैः
सुशोभितैः ॥ १२ ॥ नाना-भरण-शोभाढया नाना-रत्नोपशोभिताः ।
दृश्यन्ते रथमारुढा देव्यः क्रोध-समाकुलाः ॥ १३ ॥ शंखं चक्रं
गदां शक्तिं, हलं च मुसलायुधम् । खेटकं तोमरं चैव परशुं
पाशमेव च ॥ १४ ॥ कुन्तायुधं च खड्गं च शार्ङ्गमायुध-मुत्तमम् ।

कुलिशं च त्रिशूलं च पट्टिशं मुद्गरं तथा ॥ १५ ॥ दैत्यानां देह-नाशाय भक्ताना-मभयाय च । धारयन्त्याऽऽयुधानीत्थं देवानां तु हिताय वै ॥ १६ ॥ नमस्तेऽस्तु महारौद्रे महाघोर-पराक्रमे । महाबले महाकाये महाभय-विनाशिनि ॥ १७ ॥ त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्द्धिनि । प्राच्यां रक्षतु मामैन्द्री आग्नेय्या-मग्निदेवता ॥ १८ ॥ याम्यां रक्षतु वाराही नैर्ऋत्यां खड्ग-धारिणी । प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी ॥ १९ ॥ उदीच्यां रक्षतु कौमारी ऐशान्यां शूलधारिणी । ऊर्ध्वं ब्राह्मी च मे रक्षे-दधस्ताद् वैष्णवी तथा ॥ २० ॥ एवं दश-दिशो रक्षे-च्चामुण्डा शव-वाहना । जया मे चाग्रतः पातु विजया पातु पृष्ठतः ॥ २१ ॥ अजिता वाम-पार्श्वे तु दक्षिणे चाऽपराजिता । शिखामुद्योतिनी रक्षे-दुमा मूर्ध्नि व्यवस्थिता ॥२२॥ मालाधरी ललाटे तु भ्रुवोर्मध्ये

यशस्विनी । त्रिनेत्रा च भ्रुवौ रक्षेद् यमघण्टा च नासिके ।। २३ ।।
शंखिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वार-वासिनी । कपोलौ कालिका रक्षेत्
कर्णमूले तु शाङ्करी ।। २४ ।। नासिकायां सुगन्धा च उत्तरौष्ठे च
चर्चिका । अधरे चाऽमृतकला जिह्वायां तु सरस्वती ।। २५ ।।
दन्तान् रक्षतु कौमारी कण्ठमध्ये तु चण्डिका । घण्टिकां चित्रघण्टा
च महामाया च तालुके ।। २६ ।। कामाख्या चिबुकं रक्षेद् वाचं मे
सर्वमङ्गला । ग्रीवायां भद्रकाली च पृष्ठदेशे धनुर्धरी ।। २७ ।।
नीलग्रीवा वहिष्कण्ठे नलिकां नलकूबरी । खड्ग-धारिण्युभौ स्कन्धौ
बाहू मे वज्रधारिणी ।। २८ ।। हस्तयोर्दण्डिनी रक्षे-दम्बिका चाङ्गुलीषु
च । नखाञ्छूलेश्वरी रक्षेत् कुक्षौ रक्षेन्नलेश्वरी ।।२९।। स्तनौ रक्षेन्महा-
देवी मनः-शोक-विनाशिनी । हृदये ललिता देवी उदरे शूलधारिणी
।। ३० ।। नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा । पूतना

कामिका मेढ्रे गुदे महिषवाहिनी ॥ ३१ ॥ कट्यां भगवती रक्षे-
ज्जानुनी विन्ध्यवासिनी । जङ्घे महाबला रक्षेत् सर्वकाम-प्रदायिनी
॥ ३२ ॥ गुल्फयोर्नारसिंही च पाद-पृष्ठे च तैजसी । पादाङ्गुली:
श्रीधरी रक्षेत् पादाधस्तल-वासिनी ॥ ३३ ॥ नखान्ऽदंष्ट्रा कराली
च केशाँश्चैवोर्ध्वकेशिनी । रोमकूपेषु कौमारी त्वचं वागीश्वरी तथा
॥ ३४ ॥ रक्त-मज्जा-वसा-मांसा-न्यस्थि-मेदांसि पार्वती । अन्त्राणि
कालरात्री च पित्तं च मुकुटेश्वरी ॥ ३५ ॥ पद्मावती पद्मकोशे कफे
चूडामणिस्तथा । ज्वालामुखी नख-ज्वाला-मभेद्या सर्वसन्धिषु
॥३६॥ शुक्रं ब्रह्माणी मे रक्षे-च्छायां छत्रेश्वरी तथा । अहङ्कारं मनो
बुद्धिं रक्षेन्मे धर्म-धारिणी ॥ ३७ ॥ प्राणापानौ तथा व्यान-मुदानञ्च
समानकम् । वज्रहस्ता च मे रक्षेत् प्राणं कल्याण-दायिनी ॥ ३८ ॥
रसे रूपे च गन्धे च शब्दस्पर्शे च योगिनी । सत्त्वं रजस्तमश्चैव

रक्षेन्नारायणी सदा ॥ ३९ ॥ आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी । यशः कीर्तिञ्च लक्ष्मीञ्च सदा रक्षन्तु मातरः ॥ ४० ॥ गोत्रमिन्द्राणी मे रक्षेत् पशुन् रक्षतु चण्डिका । पुत्रान् रक्षेन्महालक्ष्मी-र्भार्यां रक्षतु वैष्णवी ॥ ४१ ॥ धनं धनेश्वरी रक्षेत् कौमारी कन्यकान् तथा । पन्थानं सुपथा रक्षेत् मार्गं क्षेमङ्करी तथा ॥ ४२ ॥ राजद्वारे महालक्ष्मी-र्विजया सर्वतः स्थिता । रक्षेन्मे सर्वगात्राणि दुर्गा दुर्गापहारिणी ॥ ४३ ॥ रक्षा-हीनन्तु यत् स्थानं वर्जितं कवचेन च । सर्वं रक्षतु मे देवी जयन्ती पापनाशिनी ॥ ४४ ॥ पदमेकन्न गच्छेत्तु यदीच्छेच्छुभमात्मनः । कवचेनावृतो नित्यं यत्र यत्रैव गच्छति ॥ ४५ ॥ तत्र तत्रार्थ-लाभश्च विजयः सार्वकामिकः । यं यं चिन्तयते कामं तं तं प्राप्नोति मानवः ॥ ४६ ॥ परमैश्वर्य-मतुलं प्राप्नोत्यविकलः पुमान् । निर्भयो जायते मर्त्यः संग्रामेष्व-

पराजितः ॥ ४७ ॥ त्रैलोक्ये स भवेत् पूज्यः कवचेनावृतः पुमान् ।
इदन्तु देव्याः कवचं देवानामपि दुर्लभम् ॥ ४८ ॥ य इदं कवचं
धृत्वा सङ्ग्रामं प्रविशेन्नरः । जित्वा च स रिपून् सर्वान् कल्याणी
गृहमाप्नुयात् ॥ ४९ ॥ यः पठेत् प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः ।
दैवीकला भवेत् तस्य त्रैलोक्ये चाऽपराजितः ॥ ५० ॥ जीवेद्
वर्षशतं साग्र-मपमृत्यु-विवर्जितः । नश्यन्ति व्याधयः सर्वे लूता-
विस्फोटकादयः ॥ ५१ ॥ स्थावरं जङ्गमं चापि कृत्रिमं चापि
यद्विषम् । अभिचाराणि सर्वाणि मन्त्र-यन्त्राणि भूतले ॥ ५२ ॥
भूचराः खेचराश्चैव सर्वजा-श्चोपदेशिकाः । सहजा कुलजा माला
डाकिनी शाकिनीति च ॥ ५३ ॥ अन्तरिक्षचरा घोरा डाकिन्यश्च
महाबालाः । ग्रह-भूत-पिशाचाश्च यक्ष-गन्धर्व-राक्षसाः ॥ ५४ ॥
ब्रह्म-राक्षस-वेतालाः कूष्माण्डा भैरवादयः । नश्यन्ति दर्शनात्

तस्य कवचे हृदि संस्थिते ॥ ५५ ॥ मानोन्नति-र्भवेद् राज्ञः तेजो-वृद्धिः परा भवेत्। यशसा वर्धते सोऽपि कीर्ति-मण्डित-भूतले ॥ ५६ ॥ तस्माद् जपेत् सदा भक्त्या कवचं कामदं मुने। जपेत् सप्तशतीं चण्डीं कृत्वा कवचमग्रतः ॥ ५७ ॥ अविघ्नेन भवेत् सिद्धिः चण्डी-जप-समुद्भवा। यावद् भूमण्डलं धत्ते सशैल-वन-काननम् ॥ ५८ ॥ तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्र-पौत्रिकी। देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम्। प्राप्नोति पुरुषो नित्यं महामाया-प्रसादतः ॥ ५९ ॥

इति श्रीवाराहपुराणे हरिहरब्रह्मचरिते श्रीदेव्याः कवचं सम्पूर्णम्।

—※—

अथ दुर्गाशापोद्धारः[१]

ॐ श्रीदुर्गादेव्यै नमः

चण्डीशाप-विमोचन-मन्त्रस्य वशिष्ठ-नारद-सामवेदाधिपति-ब्रह्माण ऋषयः सर्वैश्वर्य-कारिणी श्रीदुर्गा देवता अनुष्टुप्छन्दश्च-रितत्रयं बीजं ह्रीँ शक्तिरूपिणी चण्डीशाप-विमोचने विनियोगः ।

ॐ रीँ रेतः स्वरूपायै मधुकैटभ-मर्दिन्यै ब्रह्मशाप-विमुक्ता भव ॥ १ ॥ ॐ श्रीँ बुद्धि-रूपिण्यै महिषासुर-सैन्यनाशिन्यै ब्रह्मशाप-विमुक्ता भव ॥ २ ॥ ॐ रँ रक्तरूपिण्यै महिषासुरमर्दिन्यै ब्रह्मशाप-विमुक्ता भव ॥ ३ ॥ ॐ क्षुँ क्षुधारूपिण्यै देववन्दिन्यै ब्रह्मशाप-

१. महर्षिभिः शापितानि बहूनि निष्फलानि स्तोत्राणि सन्ति, तत्र 'दुर्गासप्तशती' अस्ति न वेति शंकायामत्राह—'दुर्गाशापोद्धारः' इति तत्त्वविदः ।

विमुक्ता भव ॥ ४ ॥ ॐ छाँ छायारूपिण्यै दूतसंवादिन्यै ब्रह्मशाप-विमुक्ता भव ॥ ५ ॥ ॐ श्रीँ शक्तिरूपिण्यै धूम्रलोचन-घातिन्यै ब्रह्मशाप-विमुक्ता भव ॥ ६ ॥ ॐ तृँ तृष्णारूपिण्यै चण्डमुण्डवध-कारिण्यै ब्रह्मशाप-विमुक्ता भव ॥७॥ ॐ क्षाँ क्षान्तिरूपिण्यै रक्तबीज-वध-कारिण्यै ब्रह्मशाप-विमुक्ता भव ॥ ८ ॥ ॐ जाँ जातिरूपिण्यै निशुम्भवध-कारिण्यै ब्रह्मशाप-विमुक्ता भव ॥ ९ ॥ ॐ लँ लज्जा-रूपिण्यै शुम्भवध-कारिण्यै ब्रह्मशाप-विमुक्ता भव ॥ १० ॥ ॐ शाँ शान्तिरूपिण्यै देवस्तुत्यै-ब्रह्मशाप-विमुक्ता भव ॥ ११ ॥ ॐ श्रँ श्रद्धारूपिण्यै फलदात्र्यै ब्रह्मशाप-विमुक्ता भव ॥ १२ ॥ ॐ काँ कान्तिरूपिण्यै राजवरदात्र्यै ब्रह्मशाप-विमुक्ता भव ॥ १३ ॥ ॐ माँ मातृरूपिण्यै अर्गलसहितायै ब्रह्मशाप-विमुक्ता भव ॥ १४ ॥ ॐ ह्रीँ श्रीँ हूँ दुर्गायै सर्वैश्वर्यकारिण्यै ब्रह्मशाप-विमुक्ता भव ॥१५॥

ॐ क्लीँ ह्रीँ ॐ नमः शिवायै अभेदकवच-रूपिण्यै ब्रह्मशापविमुक्ता भव ॥ १६ ॥ ॐ काल्यै कालि ह्रीँ फट् स्वाहायै ऋग्वेदरूपिण्यै ब्रह्मशाप-विमुक्ता भव ॥ १७ ॥ इत्येवं हि महामंत्रान् पठित्वा परमेश्वरि । चण्डीपाठं दिवारात्रौ कुर्यादेव न संशयः ॥ १८ ॥ एवं मन्त्रन्न जानाति चण्डीपाठं करोति यः । आत्मनश्चैव दातॄणां क्षयं कुर्यान्न संशयः ॥ १९ ॥

इति रुद्रयामलतन्त्रे चण्डीशापविमोचनं सम्पूर्णम् ।

अथ दुर्गाशतनामस्तोत्रम्[1]

दुर्गायाः शतनामानि शृणुध्वं भवगेहिनी । दुर्गा भवानी देवेशी विश्वनाथप्रिया शिवा ॥ १ ॥ घोरदंष्ट्रा करालास्या मुण्ड-माला-विभूषणा । रूद्राणी तारिणी तारा माहेशी भववल्लभा ॥२॥ नारायणी जगद्धात्री महादेवप्रिया जया । विजया च जयाऽऽराध्या शर्वाणी हरवल्लभा ॥ ३ ॥ अजिता चाणिमा देवी लघिमा गरिमा तथा । महेशशक्ति-विश्वेशी गौरी पर्वत-नन्दिनी ॥ ४ ॥ नित्या च निष्कलङ्का च निरीहा नित्यनूतना । रक्ता रक्तमुखी वाणी
वसुयुक्ता वसुप्रदा ॥ ५ ॥ रामप्रिया रामरता रघुनाथवरप्रदा । २०

---

१. 'यः पठेत् प्रातरुत्थाय··· ··· मन्त्रसिद्धिं लभेद् ध्रुवम् ॥ १५' इति स्मरणादिदं 'दुर्गाशतनामस्तोत्रम्' दुर्गापाठस्य नाऽङ्गमिति ज्ञेयम् । किन्तु दुर्गासप्तशतीपाठात् प्राग् इदमवश्यं स्मर्तव्यमिति प्राञ्चः ।

स्तोत्रम्’ दुर्गापाठस्य नाऽङ्गमिति ज्ञेयम्। किन्तु दुर्गासप्तशतीपाठात् प्राग् इदमवश्यं स्मर्तव्यमिति प्राञ्चः।

राज्येश्वरी राज्यरता कृष्णा कृष्णवरप्रदा ॥ ६ ॥ यशोदा राधिका चण्डी द्रौपदी रुक्मिणी तथा। गुहप्रिया गुहरता गुहवंशविलासिनी ॥ ७ ॥ गणेशजननी माता विश्वरूपा च जाह्नवी। गङ्गा काली च काशी च भैरवी भुवनेश्वरी ॥८॥ निर्मला च सुगन्धा च देवकी देवपूजिता। दक्षजा दक्षिणा दक्षा दक्षयज्ञ-विनाशिनी ॥९॥ सुशीला सुन्दरी सौम्या मातङ्गी कमला कला। निशुम्भ-नाशिनी शुम्भ-नाशिनी चण्ड-नाशिनी ॥ १० ॥ धूम्रलोचन-संहर्त्री महिषासुर-मर्दिनी। [1]मधुकैटभ-संहर्त्री रक्तबीजहराऽमरा ॥११॥ जगदीशप्रिया जन्म-नाशिनी भव-नाशिनी। घोरवक्त्रा ललज्जिह्वा अट्टहासा दिगम्बरा ॥ १२ ॥ भारती स्वर्गदा रामा भोग-मोक्ष-प्रदायिनी। उमा गौरी कराला च कामिनी विश्वमोहिनी ॥ १३ ॥ इत्येवं

१. ‘मधुकैटभसंहर्त्री’ इत्यारभ्य ‘......भोगमोक्षप्रदायिनी’ इत्यन्तं पाठः क्वचिन्नोपलभ्यते।

शतनामानि कथितानि वरानने । नामस्मरण-मात्रेण जीवन्मुक्तो भवेन्नरः ॥ १४ ॥ यः पठेत् प्रातरुत्थाय स्मृत्वा [1]दुर्गापदद्वयम् । मुच्यते जन्म-बन्धेभ्यो नात्र कार्या विचारणा ॥ १५॥ सन्ध्याकाले दिवाभागे निशायां वा निशामुखे । पठित्वा शतनामानि मन्त्रसिद्धिं लभेद् ध्रुवम् ॥ १६ ॥ अज्ञात्वा स्तवराजञ्च दशविद्या भजेद् यदि । तथापि नैव सिद्धिः स्यात् सत्यं सत्यं महेश्वरि ॥ १७ ॥

इति मुण्डमालातन्त्रे द्वितीयपटले श्रीदुर्गादेव्याः शतनामस्तोत्रं समाप्तम् ।

---

१. 'दुर्-गा' इति पदद्वयमिति भावः ।

—*—

श्री दुर्गासप्तशतीपाठप्रारम्भः

अथ ध्यानम्

ॐ विद्युद्दामसमप्रभां मृगपति-स्कन्धस्थितां भीषणां
कन्याभिःकरवालखेट-विलसद्धस्ताभिरासेविताम् ।
हस्तैश्चक्र-गदालिखेट-विशिखाँश्चापं गुणं तर्जनीं
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥

नवार्णमन्त्रः

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे

(अथ प्रथमोऽध्यायः[1])

ॐ नमश्चण्डिकायै

मार्कण्डेय उवाच ॥ १ ॥

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः । निशामय तदुत्पत्तिं विस्तराद् गदतो मम ॥ २ ॥ महामायाऽनुभावेन यथा मन्वन्तराधिपः । सं बभूव महाभागः सावर्णिस्तनयो रवेः ॥ ३ ॥ स्वारोचिषेन्तरे पूर्वं चैत्रवंश-समुद्भवः । सुरथो नाम राजाऽभूत् समस्ते क्षितिमण्डले ॥ ४ ॥ तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान् । बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तथा ॥५॥

१. 'इतिशब्दो हरेल्लक्ष्मीं तथा वन्धुविनाशनम् । अध्यायो हरते प्राणान्" इति मार्कण्डेयवचनत्रासात् त्रयोदश–(१-१३) अध्यायानां कोष्ठवद्धे नोल्लेखः कृतो मया सम्पादकेन ।

तस्य तैरभवद् युद्ध-मतिप्रबल-दण्डिनः । न्यूनैरपि स तैर्युद्धे
कोला-विध्वंसिभिर्जितः ॥ ६ ॥ ततः स्वपुरमायातो निजदेशाधि-
पोऽभवत् । आक्रान्तः स महाभागः तैस्तदा प्रबलारिभिः ॥ ७ ॥
अमात्यै-र्बलिभि-र्दुष्टै-र्दुर्बलस्य दुरात्मभिः । कोषो बलञ्चाऽपहृतं
तत्रापि स्वपुरे ततः ॥ ८ ॥ ततो मृगयाव्याजेन हृतस्वाम्यः स
भूपतिः । एकाकी हयमारुह्य जगाम गहनं वनम् ॥ ९ ॥ स
तत्राऽऽश्रम-मद्राक्षीद् द्विजवर्यस्य मेधसः । प्रशान्तश्वा-पदाकीर्णं
मुनिशिष्योपशोभितम् ॥ १० ॥ तस्थौ कञ्चित् स कालं च मुनिना
तेन सत्कृतः । इतश्चेतश्च विचरँ-स्तस्मिन् मुनिवराश्रमे ॥ ११ ॥
सोऽचिन्तयत् तदा तत्र ममत्वा-कृष्टचेतनः । मत्पूर्वैः पालितं पूर्वं २५
मया हीनं पुरं हि तत् ॥ १२ ॥ मद्भृत्यैस्तै-रसद्वृत्तै-र्धर्मतः
पालयते न वा । न जाने स प्रधानो मे शूरहस्ती सदामदः ॥ १३ ॥

मम वैरिवशं यातः कान् भोगा-नुपलप्स्यते । ये ममानुगता नित्यं प्रसादधनभोजनैः ॥ १४ ॥ अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्य-महीभृताम् । असम्यग्-व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम् ॥१५॥ सञ्चितः सोऽतिदुःखेन क्षयं कोषो गमिष्यति । एतच्चाऽन्यच्च सततं चिन्तयामास पार्थिवः ॥ १६ ॥ तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः । स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः ॥ १७ ॥ सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे । इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम् ॥ १८ ॥ प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम् ॥ १९ ॥ वैश्य उवाच ॥ २० ॥ समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले ॥ २१ ॥ पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः । विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनम् ॥ २२ ॥ वनमभ्यागतो दुःखी निरस्तश्चाप्त-बन्धुभिः । सोऽहं न वेद्मि पुत्राणां कुशला-

ऽकुशलात्मिकाम् ॥ २३ ॥ प्रवृत्तिं स्वजनानां च दाराणां चात्र
संस्थितः । किन्नु तेषां गृहे क्षेम-मक्षेमं किन्नु साम्प्रतम् ॥ २४ ॥
कथं ते किन्नु सद्‌वृत्ता दुर्वृत्ताः किन्नु मे सुताः ॥ २५ ॥ राजो-
वाच ॥२६॥ यैर्निरस्तो भवान् लुब्धैः पुत्रदारादिभिर्धनैः ॥ २७ ॥
तेषु किम्भवतः स्नेह-मनुबध्नाति मानसम् ॥ २८ ॥ वैश्य उवाच
॥२९॥ एवमेतद्यथा प्राह भवानस्मद्‌ गतं वचः ॥३०॥ किं करोमि न
बध्नाति मम निष्ठुरताम्मनः । यैः सन्त्यज्य पितृस्नेहं धनलुब्धैर्निरा-
कृतः ॥ ३१॥ पतिस्वजनहार्दं च हार्दितेष्वेव मे मनः । किमेतन्ना-
भिजानामि जानन्नपि महामते ॥३२॥ यत्प्रेमप्रवणं चित्तं विगुणेष्वपि
बन्धुषु । तेषां कृते मे निश्श्वासो दौर्मनस्यञ्च जायते ॥ ३३ ॥
करोमि किं यन्न मन-स्तेष्वप्रीतिषु निष्ठुरम् ॥३४॥ मार्कण्डेय उवाच
॥ ३५ ॥ ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ॥ ३६ ॥

समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः । कृत्वा तु तौ यथान्यायं यथार्हन्तेन संविदम् ॥३७॥ उपविष्टौ कथाः काश्चि-च्चक्रतुर्वैश्यपार्थिवौ ॥ ३८ ॥ राजोवाच ॥ ३९ ॥ भगवँस्त्वामहं प्रष्टु-मिच्छाम्येकं वदस्व तत् ॥४०॥ दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना । ममत्वं मम राज्यस्य राज्याङ्गेष्वखिलेष्वपि ॥४१॥ जानतोऽपि यथाज्ञस्य किमे-तन्मुनिसत्तम । अयं च निकृतः पुत्रै-र्दारैर्भृत्यै-स्तथोज्झितः ॥ ४२ ॥ स्वजनेन च संत्यक्त-स्तेषु हार्दी तथाप्यति । एवमेष तथाहं च द्वावप्यत्यन्तदुःखितौ ॥४३॥ दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ । तत्केनैतन्महाभाग यन्मोहो ज्ञानिनोरपि ॥ ४४ ॥ ममाऽस्य च भवत्येषा विवेकान्धस्य मूढता ॥ ४५ ॥ ऋषिरुवाच ॥४६॥ ज्ञान-मस्ति समस्तस्य जन्तोर्विषयगोचरे ॥४७॥ विषयश्च महाभाग जाति-श्चैवं पृथक् पृथक् । दिवान्धाः प्राणिनः केचिद् रात्रावन्धास्तथाऽपरे

॥ ४८ ॥ केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्य-दृष्टयः । ज्ञानिनो
मनुजाः सत्यं किन्तु ते न हि केवलम् ॥ ४९ ॥ यतो हि ज्ञानिनः
सर्वे पशुपक्षिमृगादयः । ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम्
॥ ५० ॥ मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः । ज्ञानेऽपि
सति पश्यैतान् पतगाञ्छा-वचञ्चुषु ॥ ५१ ॥ कणमोक्षा-दृतान्मोहात्
पीड्यमानानपि क्षुधा । मानुषा मनुजव्याघ्र साभिलाषाः सुतान्
प्रति ॥५२॥ लोभात् प्रत्युपकाराय नन्वेते किन्न पश्यसि । तथापि
ममतावर्ते मोहगर्ते निपातिताः ॥ ५३ ॥ महामाया-प्रभावेण संसार-
स्थिति-कारिणः । तन्नाऽत्र विस्मयः कार्यो योगनिद्रा जगत्पतेः ॥५४॥
महामाया हरेश्चैषा तया सम्मोह्यते जगत् । ज्ञानिनामपि चेतांसि
देवी भगवती हि सा ॥ ५५ ॥ बलादाकृष्य मोहाय महामाया
प्रयच्छति । तया विसृज्यते विश्वं जगदेतच्चराचरम् ॥ ५६ ॥ सैषा

प्रसन्ना वरदा नृणाम्भवति मुक्तये । सा विद्या परमा मुक्ते-र्हेतुभूता सनातनी ॥ ५७ ॥ संसारबन्ध-हेतुश्च सैव सर्वेश्वरेश्वरी ॥ ५८ ॥ राजोवाच ॥ ५९ ॥ भगवन् का हि सा देवी महामायेति याम्भवान् ॥६०॥ ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज । यत्स्वभावा च सा देवी यत्स्वरूपा यदुद्भवा ॥ ६१ ॥ तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ ६२ ॥ ऋषिरुवाच ॥ ६३ ॥ नित्यैव सा जगन्मूर्तिस्तया सर्वमिदन्ततम् ॥६४॥ तथापि तत्समुत्पत्ति-र्बहुधा श्रूयतां मम । देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥ ६५ ॥ उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते । योगनिद्रां यदा विष्णु-र्जगत्येकार्णवीकृते ॥ ६६ ॥ आस्तीर्य्य शेषमभजत् कल्पान्ते ३०
भगवान् प्रभुः । तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ॥ ६७ ॥ विष्णुकर्ण-मलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ । स नाभिकमले विष्णोः

स्थितो ब्रह्मा प्रजापतिः ॥ ६८ ॥ दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च
जनार्दनम् । तुष्टाव योगनिद्रां ता-मेकाग्रहृदयः स्थितः ॥ ६९ ॥
विबोधनार्थाय हरे-र्हरिनेत्र-कृतालयाम् ॥७०॥ ब्रह्मोवाच ॥७१॥
विश्वेश्वरीं जगद्धात्रीं स्थितिसंहार-कारिणीम् ॥७२॥ स्तौमि निद्रां
भगवतीं विष्णो-रतुलतेजसः। त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कार-
स्वरात्मिका ॥७३॥ सुधा त्वमक्षरे नित्ये त्रिधामात्रात्मिका स्थिता ।
अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः ॥ ७४ ॥ त्वमेव सा
त्वं सावित्री त्वन्देवि जननी परा । त्वयैतद्धार्यते विश्वं त्वयैतत्
सृज्यते जगत् ॥ ७५ ॥ त्वयैतत् पाल्यते देवि त्वमत्स्यन्ते च
सर्वदा । विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ॥ ७६ ॥
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये । महाविद्या महामाया
महामेधा महास्मृतिः ॥ ७७ ॥ महामोहा च भवती महादेवी

महासुरी । प्रकृतिस्त्वं च सर्वस्य गुणत्रय-विभाविनी ॥ ७८ ॥ कालरात्रि-र्महारात्रि-र्मोहरात्रिश्च दारुणा । त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥ ७९ ॥ लज्जा पुष्टिस्तथा तुष्टिः त्वं शान्तिः क्षान्तिरेव च । खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ ८० ॥ शङ्खिनी चापिनी बाणा भुशुण्डी परिघायुधा । सौम्या सौम्यतराशेष-सौम्येभ्य-स्त्वतिसुन्दरी ॥ ८१ ॥ परा पराणां परमा त्वमेव परमेश्वरी । यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥ ८२ ॥ तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा । यया त्वया जगत्स्रष्टा जगत्पाताऽत्ति यो जगत् ॥ ८३ ॥ सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः । विष्णुः शरीरग्रहण-महमीशान एव च ॥ ८४ ॥ कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् । सा त्वमित्थं प्रभावैः स्वै-रुदारैर्देवि संस्तुता

॥८५॥ मोहयैतौ दुराधर्षा-वसुरौ मधुकैटभौ। प्रबोधं च जगत्स्वामी
नीयतामच्युतो लघु ॥८६॥ बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ
॥ ८७ ॥ ऋषिरुवाच ॥ ८८ ॥ एवं स्तुता तदा देवी तामसी
तत्र वेधसा ॥ ८९ ॥ विष्णोः प्रबोधनार्थाय तिहन्तुं मधुकैटभौ ।
नेत्रास्य-नासिका-बाहु-हृदयेभ्य-स्तथोरसः ॥ ९० ॥ निर्गम्य दर्शने
तस्थौ ब्रह्मणोऽव्यक्तजन्मनः। उत्तस्थौ च जगन्नाथः तया मुक्तो
जनार्दनः ॥ ९१ ॥ एकार्णवेऽहिशयनात् ततः स ददृशे च तौ। मधु-
कैटभौ दुरात्माना-वतिवीर्यपराक्रमौ ॥९२॥ क्रोधरक्तेक्षणावत्तुं ब्रह्माणं
जनितोद्यमौ। समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः ॥९३॥
पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः। तावप्यति-बलोन्मत्तौ महामाया-
विमोहितौ ॥ ९४ ॥ उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम्
॥ ९५ ॥ श्रीभगवानुवाच ॥ ९६ ॥ भवेतामद्य मे तुष्टौ मम

वध्यावुभावपि ॥ ९७ ॥ किमन्येन वरेणात्र एतावद्धि वृतं मया ॥ ९८ ॥ ऋषिरुवाच ॥ ९९ ॥ वञ्चिताभ्यामिति तदा सर्वमापोमयञ्जगत् ॥ १०० ॥ विलोक्य ताभ्याङ्गदितो भगवान् कमलेक्षणः । प्रीतौ स्वस्तव युद्धेन श्लाध्यस्त्वं मृत्युरावयोः । आवाञ्जहि न यत्रोर्वी सलिलेन परिप्लुता ॥ १०१ ॥ ऋषिरुवाच ॥ १०२ ॥ तथेत्युक्त्वा भगवता शङ्खचक्र-गदाभृता । कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः ॥ १०३ ॥ एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम् । प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते ॥ १०४ ॥

(इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये मधुकैटभवधः ॥ १ ॥)

(अथ द्वितीयोऽध्यायः)

ऋषिरुवाच ॥१॥ देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा । महिषेऽसुराणामधिपे देवानां च पुरन्दरे ॥२॥ तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम्। जित्वा च सकलान् देवानिन्द्रोऽभून्महिषासुरः ॥ ३ ॥ ततः पराजिता देवाः पद्मयोनिं प्रजापतिम् । पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ॥ ४ ॥ यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम्। त्रिदशाः कथयामासुर्देवाभिभवविस्तरम् ॥५॥ सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च। अन्येषां चाधिकारन् स स्वयमेवाधितिष्ठति ॥६॥ स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि । विचरन्ति यथा मर्त्या महिषेण दुरात्मना ॥ ७ ॥ एतद्वः कथितं सर्व-ममरारिविचेष्टितम्। शरणं च प्रपन्नाः स्मो वधस्तस्य विचिन्त्यताम् ॥८॥ इत्थं निशम्य

देवानां वचांसि मधुसूदनः। चकार कोपं शम्भुश्च भ्रकुटीकुटिलाननौ ॥ ९ ॥ ततोऽतिकोपपूर्णस्य चक्रिणो वदनात् ततः। निश्चक्राम महत्तेजो ब्रह्मणः शङ्करस्य च ॥ १० ॥ अन्येषां चैव देवानां शक्रादीनां शरीरतः। निर्गतं सुमहत्तेजः तच्चैक्यं समगच्छत ॥११॥ अतीव तेजसः कूटं ज्वलन्तमिव पर्वतम्। ददृशुस्ते सुरास्तत्र ज्वालाव्याप्त-दिगन्तरम् ॥ १२ ॥ अतुलं तत्र तत्तेजः सर्वदेव-शरीरजम्। एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा ॥ १३ ॥ यदभूच्छाम्भवन्तेज-स्तेनाजायत तन्मुखम्। याम्येन चाभवन् केशा बाहवो विष्णुतेजसा ॥ १४ ॥ सौम्येन स्तनयोर्युग्मं मध्यश्चैन्द्रेण चाभवत्। वारुणेन च जङ्घोरू नितम्बस्तेजसा भुवः ॥ १५ ॥ ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा। वसूनां च करांगुल्यः कौवेरेण च नासिका ॥१६॥ तस्यास्तु दन्ताः सम्भूताः प्राजापत्येन

तेजसा । नयनत्रितयं जज्ञे तथा पावकतेजसा ॥ १७ ॥ भ्रुवौ च
सन्धयोस्तेजः श्रवणावनिलस्य च । अन्येषां चैव देवानां सम्भव-
स्तेजसां शिवा ॥ १८ ॥ ततः समस्तदेवानां तेजोराशिसमुद्भवाम् ।
तां विलोक्य मुदं प्रापु-रमरा महिषार्दिताः ॥१९॥ शूलं शूलाद्-वि-
निष्कृष्य ददौ तस्यै पिनाकधृक् । चक्रं च दत्तवान् कृष्णः समुत्पाद्य
स्वचक्रतः ॥ २० ॥ शङ्खञ्च वरुणः शक्तिं ददौ तस्यै हुताशनः ।
मारुतो दत्तवाँश्चापं बाणपूर्णे तथेषुधी ॥ २१ ॥ वज्रमिन्द्रः समुत्पाद्य
कुलिशादमराधिपः । ददौ तस्यै सहस्राक्षो घण्टामैरावताद् गजात्
॥ २२ ॥ कालदण्डाद्यमो दण्डं पाशं चाम्बुपतिर्ददौ । प्रजापतिश्चा-
क्षमालान् ददौ ब्रह्मा कमण्डलुम् ॥ २३ ॥ समस्तरोमकूपेषु निजर-
श्मीन् दिवाकरः । कालश्च दत्तवान् खड्गं तस्यै चर्म च निर्मलम्
॥ २४ ॥ क्षीरोदश्चामलं हार-मजरे च तथाम्बरे । चूडामणिं तथा

दिव्यं कुण्डले कटकानि च ॥ २५ ॥ अर्धचन्द्रं तथा शुभ्रं केयूरान्
सर्वबाहुषु । नूपुरौ विमलौ तद्वद्-ग्रैवेयकमनुत्तमम् ॥ २६ ॥ अंगुली-
यकरत्नानि समस्तास्वङ्गुलीषु च । विश्वकर्मा ददौ तस्यै परशुं चाति-
निर्मलम् ॥ २७ ॥ अस्त्राण्यनेकरूपाणि तथाऽभेद्यञ्च दंशनम् । अम्ला-
नपङ्कजां मालां शिरस्युरसि चापराम् ॥२८॥ अददज्जलधिः तस्यै
पङ्कजं चातिशोभनम् । हिमवान् वाहनं सिंहं रत्नानि विविधानि
च ॥ २९ ॥ ददावशून्यं सुरया पानपात्रं धनाधिपः । शेषश्च सर्व-
नागेशो महामणिविभूषितम् ॥ ३० ॥ नागहारं ददौ तस्यै धत्ते यः
पृथिवीमिमाम् । अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ॥ ३१ ॥ सम्मा-
निता ननादोच्चैः साट्टहासं मुहुर्मुहुः । तस्या नादेन घोरेण कृत्स्न-
मापूरितन्नभः ॥ ३२ ॥ अमायतातिमहता प्रतिशब्दो महानभूत् ।
चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे ॥ ३३ ॥ चचाल वसुधा

चेलुः सकलाश्च महीधराः। जयेति देवाश्च मुदा तामूचुः सिंहवाहि-
नीम् ॥ ३४ ॥ तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः। दृष्ट्वा समस्तं
संक्षुब्धं त्रैलोक्यममरारयः ॥ ३५॥ सन्नद्धाखिलसैन्यास्ते समुत्तस्थु-
रुदायुधाः। आः किमेतदिति क्रोधादाभाष्य महिषासुरः ॥ ३६ ॥
अभ्यधावत तं शब्दमशेषै-रसुरैर्वृतः। स ददर्श ततो देवीं व्याप्त-
लोकत्रयान्त्विषा ॥ ३७ ॥ पादाक्रान्त्या नतभुवं किरीटोल्लिखि-
ताम्बराम्। क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ॥ ३८ ॥
दिशो भुजसहस्रेण समन्ताद् व्याप्य संस्थिताम्। ततः प्रववृते युद्धं
तया देव्या सुरद्विषाम् ॥३९॥ शस्त्रास्त्रैर्बहुधा मुक्तै-रादीपित-दिग-
न्तरम्। महिषासुर-सेनानी-श्चिक्षुराख्यो महासुरः ॥ ४० ॥ युयुधे
चामरश्चान्यै-श्चतुरङ्ग-बलान्वितः। रथानामयुतैः षड्भि-रुदग्राख्यो
महासुरः ॥ ४१ ॥ अयुध्यतायुतानां च सहस्रेण महाहनुः। पञ्चा-

शद्भिश्च नियुतै-रसिलोमा महासुरः ॥ ४२ ॥ अयुतानां शतैः षड्भि-
र्बाष्कलो युयुधे रणे । गज-वाजि-सहस्रौघै-रनेकैः परिवारितः ॥४३॥
वृतो रथानां कोट्या च युद्धे तस्मिन्नयुद्ध्यत । बिडालाख्योऽयुतानां
च पञ्चाशद्भि-रथायुतैः ॥ ४४ ॥ युयुधे संयुगे तत्र रथानां परिवा-
रितः । अन्ये च तत्राऽयुतशो रथनागहयैर्वृताः ॥ ४५ ॥ युयुधुः
संयुगे देव्या सह तत्र महासुराः । कोटि-कोटि-सहस्रैस्तु रथानां
दन्तिनां तथा ॥ ४६ ॥ हयानां च वृतो युद्धे तत्राऽभून्महिषासुरः ।
तोमरै-र्भिन्दिपालैश्च शक्तिभि-र्मुशलैस्तथा ॥ ४७ ॥ युयुधुः संयुगे
देव्या खड्गैः परशुपट्टिशैः । केचिच्च चिक्षिपुः शक्तीः केचित् पाशाँ-
स्तथाऽपरे ॥ ४८ ॥ देवीङ्खड्ग-प्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ।
सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ॥ ४९ ॥ लीलयैव
प्रचिच्छेद निज-शस्त्रास्त्र-वर्षिणी । अनायस्तानना देवी स्तूयमाना

सुरर्षिभिः ॥ ५० ॥ मुमोचाऽसुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ।
सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेसरी ॥ ५१ ॥ चचाराऽसुर-
सैन्येषु वनेष्विव हुताशनः । निःश्वासान् मुमुचे यांश्च युध्यमाना
रणेऽम्बिका ॥ ५२ ॥ त एव सद्यः सम्भूता गणाः शत-सहस्रशः ।
युयुधुस्ते परशुभि-र्भिन्दिपालासि-पट्टिशैः ॥ ५३ ॥ नाशयन्तोऽ-
सुरगणान् देवीशक्त्युपबृंहिता । अवादयन्त पटहान् गणाः शङ्खां-
स्तथा परे ॥ ५४ ॥ मृदङ्गांश्च तथैवाऽन्ये तस्मिन् युद्धमहोत्सवे ।
ततो देवी त्रिशूलेन गदया शक्ति-वृष्टिभिः ॥ ५५ ॥ खड्गादिभिश्च
शतशो निजघान महासुरान् । पातयामास चैवान्यान् घण्टास्वन-
विमोहितान् ॥ ५६ ॥ असुरान् भुवि पाशेन बद्ध्वा चान्यानकर्ष-
यत् । केचिद् द्विधा कृतास्तीक्ष्णैः खड्गपातैस्तथाऽपरे ॥ ५७ ॥
विपोथिता निपातेन गदया भुवि शेरते । वेमुश्च केचिद् रुधिरं

मुसलेन भृशं हताः ॥ ५८ ॥ केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि । निरन्तराः शरौघेण कृताः केचिद् रणाजिरे ॥ ५९ ॥ श्येनाऽनुकारिणः प्राणान् मुमुचुः त्रिदशार्दनाः। केषाञ्चिद् बाहवश्छिन्नाः छिन्नग्रीवा-स्तथाऽपरे ॥ ६० ॥ शिरांसि पेतुरन्येषा-मन्ये मध्ये विदारिताः। विच्छिन्न-जङ्घास्त्वपरे पेतुरुर्व्यां महासुराः ॥६१॥ एकबाह्वक्षि-चरणाः केचिद्देव्या द्विधा कृताः। छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः ॥ ६२ ॥ कबन्धा युयुधुर्देव्या गृहीत-परमायुधाः । ननृतुश्चाऽपरे तत्र युद्धे तूर्यलयाश्रिताः ॥ ६३ ॥ कबन्धाश्छिन्न-शिरसः खड्ग-शक्त्यृष्टिपाणयः। तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महासुराः ॥६४॥ पातितै रथनागाश्वै-रसुरैश्च वसुन्धरा । अगम्या साऽभवत्तत्र यत्राभूत् स महारणः ॥ ६५ ॥ शोणितौघा महानद्यः सद्यस्तत्र विसुस्रुवुः । मध्ये चासुरसैन्यस्य वारणाऽसुर-

वाजिनाम् ॥ ६६ ॥ क्षणेन तन्महासैन्य-मसुराणां तथाऽम्बिका ।
निन्ये क्षयं यथा वह्निः तृणदारु-महाचयम् ॥ ६७ ॥ स च सिंहो
महानाद-मुत्सृजन् धुतकेसरः । शरीरेभ्योऽमरारीणा-मसूनिव विचि-
न्वति ॥ ६८ ॥ देव्या गणैश्च तैस्तत्र कृतं युद्धं तथाऽसुरैः ।
यथैषां तुष्टुवुर्देवाः पुष्पवृष्टिमुचो दिवि ॥ ६९ ॥

(इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये महिषासुरसैन्यवधः ॥३॥)

(अथ तृतीयोऽध्यायः)

ऋषिरुवाच ॥१॥ निहन्यमानं तत्सैन्य-मवलोक्य महासुरः ।
सेनानीश्चिक्षुरः कोपाद् ययौ योद्धु-मथाम्बिकाम् ॥ २ ॥ स देवीं
शरवर्षेण ववर्ष समरेऽसुरः । यथा मेरुगिरेः शृङ्गं तोयवर्षेण तोयदः
॥ ३ ॥ तस्यच्छित्त्वा ततो देवी लीलयैव शरोत्करान् । जघान
तुरगान् बाणैः यन्तारं चैव वाजिनाम् ॥ ४ ॥ चिच्छेद च धनुः
सद्यो ध्वजं चाऽतिसमुच्छ्रितम् । विव्याध चैव गात्रेषु छिन्न-धन्वान-
माशुगैः ॥ ५ ॥ सच्छिन्नधन्वा विरथो हताश्वो हतसारथिः ।
अभ्यधावत तां देवीं खड्ग-चर्मधरोऽसुरः ॥ ६ ॥ सिंहमाहत्य
खड्गेन तीक्ष्णधारेण मूर्द्धनि । आजघान भुजे सव्ये देवीम-प्यतिवे-
गवान् ॥ ७ ॥ तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन । ततो

गवान् ॥ ७ ॥ तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन । ततो

जग्राह शूलं स कोपादरुणलोचनः ॥ ८ ॥ चिक्षेप च ततस्तत्तु
भद्रकाल्यां महासुरः । जाज्वल्य-मानं तेजोभी रविबिम्ब-मिवाम्ब-
रात् ॥ ९ ॥ दृष्ट्वा तदापतच्छूलं देवी शूलममुञ्चत । तच्छूलं शतधा
तेन, नीतं स च महासुरः ॥१०॥ हते तस्मिन् महावीर्ये महिषस्य
चमूपतौ । आजगाम गजारूढ-श्चामर-स्त्रिदशार्दनः ॥ ११ ॥
सोऽपि शक्तिं मुमोचाऽथ देव्यास्ता-मम्बिका द्रुतम् । हुँकाराभिहतां
भूमौ पातयामास निष्प्रभाम् ॥ १२ ॥ भग्नां शक्तिं निपतितां दृष्ट्वा
क्रोधसमन्वितः । चिक्षेप चामरः शूलं बाणैस्तदपि साऽच्छिनत ॥१३॥
ततः सिंहः समुत्पत्य गजकुम्भान्तरे स्थितः । बाहुयुद्धेन युयुधे तेनो-
च्चैः त्रिदशारिणा ॥१४॥ युध्यमानौ ततस्तौ तु तस्मान् नागान् महीं
गतौ । युयुधातेऽतिसंरब्धौ प्रहारै-रतिदारुणैः ॥ १५ ॥ ततो वेगात्
खमुत्पत्य निपत्य च मृगारिणा । करप्रहारेण शिरश्चामरस्य पृथक्-

कृतम् ॥ १६ ॥ उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः । दन्त-
मुष्टि-तलैश्चैव करालश्च निपातितः ॥ १७ ॥ देवी क्रुद्धा गदा-
पातै-श्चूर्णयामास चोद्धतम् । बाष्कलं भिन्दि-पालेन बाणैस्ताम्रं
तथान्धकम् ॥ १८ ॥ उग्रास्यमुग्रवीर्यं च तथैव च महाहनुम् । त्रिनेत्रा
च त्रिशूलेन जघान परमेश्वरी ॥ १९ ॥ बिडालस्याऽसिना कायात्
पातयामास वै शिरः । दुर्द्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् ॥२०॥
एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः । माहिषेण स्वरूपेण त्रास-
यामास तान् गणान् ॥२१॥ काँश्चित् तुण्डप्रहारेण खुरक्षेपैस्तथा-
परान् । लाङ्गूल-ताडिताँश्चान्यान् शृङ्गाभ्यां च विदारितान् ॥२२॥
वेगेन काँश्चिदपरान् नादेन भ्रमणेन च । निःश्वास-पवनेनान्यान्
पातयामास भूतले ॥ २३ ॥ निपात्य प्रमथानीक-मभ्यधावत सोऽ-
सुरः । सिंहं हन्तुं महादेव्याः कोपं चक्रे ततोऽम्बिका ॥ २४ ॥

सोऽपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः । शृङ्गाभ्यां पर्वतानुच्चाँ-
श्चिक्षेप च ननाद च ॥ २५ ॥ वेगभ्रमण-विक्षुण्णा मही तस्य व्यशी-
र्यत । लाङ्गूलेनाऽऽहत-श्चाब्धिः प्लावयामास सर्वतः ॥ २६ ॥
धुतशृङ्ग-विभिन्नाश्च खण्डखण्डं ययुर्घनाः । श्वासानिलास्ताः शतशो
निपेतुर्नभसोऽचलाः ॥ २७ ॥ इति क्रोधसमाध्मात-मापतन्तं महा-
सुरम् । दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाऽकरोत् ॥ २८ ॥
सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरम् । तत्याज माहिषं रूपं
सोऽपि बद्धो महामृधे ॥ २९ ॥ ततः सिंहोऽभवत् सद्यो यावत्तस्या-
म्बिका शिरः । छिनत्ति तावत् पुरुषः खड्गपाणिरदृश्यत ॥ ३० ॥
तत एवाशु पुरुषं देवी चिच्छेद सायकैः । तङ्खड्गचर्मणा सार्द्धं ततः
सोऽभून्महागजः ॥३१॥ करेण च महासिंहं तं चकर्ष जगर्ज च ।
कर्षतस्तु करं देवी खड्गेन निरकृन्तत ॥३२॥ ततो महासुरो भूयो

माहिषं वपुरास्थितः । तथैव क्षोभयामास त्रैलोक्यं सचराऽचरम् ॥३३॥
ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् । पपौ पुनः पुनश्चैव
जहासारुण-लोचना ॥ ३४॥ ननर्द चाऽसुरः सोऽपि बलवीर्य-मदो-
द्धतः । विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् ॥ ३५ ॥ सा
च तान् प्रहितांस्तेन चूर्णयन्ती शरोत्करैः । उवाच तं मदोद्धूतं मुख-
रागाकुलाक्षरम् ॥ ३६ ॥ देव्युवाच ॥ ३७ ॥ गर्ज गर्ज क्षणं मूढ
मधु यावत् पिबाम्यहम् । मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः
॥ ३८ ॥ ऋषिरुवाच ॥३९॥ एवमुक्त्वा समुत्पत्य साऽऽरूढा तं
महासुरम् । पादेनाऽऽक्रम्य कण्ठे च शूलेनैनमताडयत् ॥४०॥ ततः
सोऽपि पदाक्रान्तः तया निजमुखात् ततः । अर्द्धनिष्क्रान्त एवासीद्
देव्या वीर्येण संवृतः ॥ ४१ ॥ अर्द्धनिष्क्रान्त एवासौ युध्यमानो
महासुरः । तया महासिना देव्या शिरश्छित्त्वा निपातितः ॥ ४२॥

ततो हा हा कृतं सर्वं दैत्यसैन्यं ननाश तत्। प्रहर्षं च परञ्जग्मुः सकला देवतागणाः ॥ ४३ ॥ तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः। जगुर्गन्धर्व-पतयो ननृतु-श्चाप्सरोगणाः ॥ ४४ ॥

(इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये महिषासुरवधः ॥ ३ ॥)

(अथ चतुर्थोऽध्यायः)

ऋषिरुवाच ॥१॥ शक्रादयः सुरगणा निहतेऽतिवीर्ये तस्मिन्
दुरात्मनि सुरारिबले च देव्या । तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्ष-पुलकोद्गम-चारुदेहाः ॥२॥ (देवा ऊचुः) । देव्या
यया ततमिदं जगदात्मशक्त्या निश्शेष-देवगण-शक्ति-समूहमूर्त्त्या ।
तामम्बिकाम-खिलदेव-महर्षिपूज्यां भक्त्या नताः स्म विदधातु शुभानि
सा नः ॥ ३ ॥ यस्याः प्रभावमतुलं भगवाननन्तो ब्रह्मा हरश्च न
हि वक्तुमलं बलं च । सा चण्डिकाऽखिल-जगत्परिपालनाय
नाशाय चाऽशुभ-भयस्य मतिं करोतु ॥४॥ या श्रीः स्वयं सुकृतिनां ५०
भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः । श्रद्धा सतां
कुलजन-प्रभवस्य लज्जा तां त्वां नताः स्म परिपालय देवि विश्वम्

कुलजन-प्रभवस्य लज्जा तां त्वां नताः स्म परिपालय देवि विश्वम् ॥

॥ ५ ॥ किं वर्णयाम तव रूपमचिन्त्यमेतत् किञ्चातिवीर्य-मसुरक्षय-कारि भूरि । किं चाहवेषु चरितानि तवातियानि सर्वेषु देव्यसुरदेव-गणादिकेषु ॥ ६ ॥ हेतुः समस्त-जगतान्त्रि-गुणाऽपि दोषै-र्न ज्ञायसे हरिहरादि-भिरप्यपारा । सर्वाश्रयाऽखिलमिदं जगदंशभूत-मव्याहृता हि परमा प्रकृतिस्त्वमाद्या ॥ ७ ॥ यस्याः समस्तसुरता समुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि । स्वाहाऽसि वै पितृ-गणस्य च तृप्तिहेतु-रुच्चार्यसे त्वमत एव जनैः स्वधा च ॥८॥ या मुक्ति-हेतुरविचिन्त्य-महाव्रता [1]च, अभ्यस्यसे सुनियतेन्द्रिय-तत्त्वसारैः । मोक्षार्थिभि-र्मुनिभिरस्त-समस्तदोषै-र्विद्याऽसि सा भगवती परमा हि देवि ॥ ९ ॥ शब्दात्मिका सुविमलर्ग्य-जुषान्निधान-मुद्गीथरम्य-पदपाठवतां च साम्नाम् । देवी त्रयी भगवती भवभावनाय वार्ता च

राष्ट्रीय संस्कृत संस्थान
जयपुर परिसर, जयपुर
पुस्तकालय
15392

१. 'त्वमभ्यस्यसे' इति पा०

सर्वजगतां परमार्तिहन्त्री ॥ १० ॥ मेधाऽसि देवि विदिताऽखिल-
शास्त्रसारा दुर्गाऽसि दुर्गभवसागर-नौरसङ्गा। श्रीः कैटभारि-हृदयैक-
कृताधिवासा गौरी त्वमेव शशिमौलि-कृतप्रतिष्ठा ॥११॥ ईषत्सहा-
सममलं परिपूर्णचन्द्र-विम्बानुकारि कनकोत्तम-कान्तिकान्तम् ।
अत्यद्भुतं प्रहृतमात्तरुषा तथापि वक्त्रं विलोक्य सहसा महिषा-
सुरेण ॥ १२ ॥ दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल-मुद्यच्छशाङ्क-
सदृशच्छवि यन्न सद्यः। प्राणान् मुमोच महिष-स्तदतीव चित्रं
कैर्जीव्यते हि कुपिताऽन्तक-दर्शनेन ॥ १३ ॥ देवि प्रसीद परमा
भवती भवाय सद्यो विनाशयसि कोपवती कुलानि । विज्ञातमेतद-
धुनैव यदस्तमेत-न्नीतं बलं सुविपुलं महिषासुरस्य ॥ १४ ॥ ते
सम्मता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति धर्मवर्गः।
धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवती प्रसन्ना

धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवती प्रसन्ना

।। १५ ।। धर्म्याणि देवि सकलानि सदैव कर्मा-ण्यत्यादृतः प्रति-
दिनं सुकृती करोति । स्वर्गं प्रयाति च ततो भवती प्रसादा-ल्लोक-
त्रयेऽपि फलदा ननु देवि तेन ।। १६ ।। दुर्गे स्मृता हरसि भीति-
मशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभान् ददासि । दारिद्र्य-
दुःखभय-हारिणि का त्वदन्या सर्वोपकार-करणाय सदार्द्रचित्ता ।।१७।।
एभिर्हतै-र्जगदुपैति सुखं तथैते कुर्वन्तु नाम नरकाय चिराय पापम्।
सङ्ग्राम-मृत्युमधिगम्य दिवं प्रयान्तु मत्वेति नूनमहितान् विनिहंसि
देवि ।।१८।। दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वाऽसुरानरिषु
यत् प्रहिणोषि शस्त्रम् । लोकान् प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वहितेषु साध्वी ।। १९ ।। खड्गप्रभानि-करवि-
स्फुरणै-स्तथोग्रैः शूलाग्रकान्ति-निवहेन दृशोऽसुराणाम् । यन्नागता
विलयमं-शुमदिन्दुखण्ड-योग्याननं तव विलोकयतां तदेतत् ।।२०।।

दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदविचिन्त्य-मतुल्यमन्यैः ।
वीर्यं च हन्तृ हृतदेवपराक्रमाणां वैरिष्वपि प्रकटितैव दया त्वयेत्थम्
॥ २१ ॥ केनोपमा भवतु तेऽस्य पराक्रमस्य रूपं च शत्रुभयकार्य-
तिहारि कुत्र । चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे
भुवनत्रयेऽपि ॥ २२ ॥ त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं त्वया
समरमूर्धनि तेऽपि हत्वा । नीता दिवं रिपुगणा-भयमप्यपास्त-मस्मा-
कमुन्मदसुरारि-भवन्नमस्ते ॥ २३ ॥ शूलेन पाहि नो देवि पाहि
खड्गेन चाम्बिके। घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥२४॥
प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे । भ्रामणेनात्मशूलस्य
उत्तरस्यां तथेश्वरि ॥ २५ ॥ सौम्यानि यानि रूपाणि त्रैलोक्ये विच-
रन्ति ते । यानि चात्यर्थघोराणि तैरक्षास्मांस्तथा भुवम् ॥ २६ ॥
खड्ग-शूल-गदादीनि यानि चास्त्राणि तेऽम्बिके । करपल्लवसङ्गीनि

तैरस्मान् रक्ष सर्वतः ॥ २७ ॥ ऋषिरुवाच ॥ २८ ॥ एवं स्तुता
सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः । अर्चिता जगतां धात्री तथा गन्धानु-
लेपनैः ॥ २९ ॥ भक्त्या समस्तै-स्त्रिदशै-र्दिव्यैर्धूपैस्तु धूपिता ।
प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान् ॥ ३० ॥ देव्युवाच
॥ ३१ ॥ व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम् । ददाम्यह-
मिति प्रीत्या स्तवैरेभिः सुपूजिता ॥३२॥ देवा ऊचुः ॥ ३३ ॥ भग-
वत्या कृतं सर्वं न किञ्चिदवशिष्यते ॥ ३४ ॥ यदयं निहतः शत्रुर-
स्माकं महिषासुरः । यदि चापि वरो देयस्त्वयास्माकं महेश्वरि ॥३५॥
संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः । यश्च मर्त्यः स्तवैरेभि-
स्त्वां स्तोष्यत्यमलानने ॥ ३६ ॥ तस्य वित्तर्द्धि-विभवै-र्धनदारादि-
सम्पदाम् । वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाऽम्बिके ॥ ३७ ॥
ऋषिरुवाच ॥ ३८ ॥ इति प्रसादिता देवैर्जगतोऽर्थे तथात्मनः ।

तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ॥ ३९ ॥ इत्येतत्कथितं भूप सम्भूता सा यथा पुरा । देवी देवशरीरेभ्यो जगत्त्रय-हितैषिणी ॥ ४० ॥ पुनश्च गौरीदेहा सा समुद्भूता यथाऽभवत् । वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः ॥ ४१ ॥ रक्षणाय च लोकानां देवानामुपकारिणी । तच्छृणुष्व मयाऽऽख्यातं यथावत् कथयामि ते ॥ ४२ ॥

(इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शक्रादिस्तुतिः ॥ ४ ॥)

(अथ पञ्चमोऽध्यायः)

ऋषिरुवाच ॥१॥ पुरा शुम्भ-निशुम्भाभ्या-मसुराभ्यां शचीपतेः । त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ॥ २ ॥ तावेव सूर्यतां तद्वदधिकारं तथैन्दवम् । कौवेरमथ याम्यञ्च चक्राते वरुणस्य च ॥ ३ ॥ तावेव पवनर्द्धिञ्च चक्रतुर्वह्निकर्म च । ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ॥ ४ ॥ हृताधिकारा-स्त्रिदशा-स्ताभ्यां सर्वे निराकृताः । महासुराभ्यां तान्देवीं संस्मरन्त्यपराजिताम् ॥ ५ ॥ तयाऽस्माकं वरो दत्तो यथापत्सु स्मृताऽखिलाः । भवतां नाशयिष्यामि तत्क्षणात् परमापदः ॥६॥ इति कृत्वा मतिन्देवा हिमवन्तं नगेश्वरम् । जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ॥ ७ ॥ देवा ऊचुः ॥ ८ ॥ नमो देव्यै महादेव्यै शिवायै सततन्नमः । नमः

प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥ ९ ॥ रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः । ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततन्नमः ॥ १० ॥ कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो-नमः । नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥ ११ ॥ दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै । ख्यात्यै तथैव कृष्णायै धूम्रायै सततन्नमः ॥ १२ ॥ अतिसौम्याऽतिरौद्रायै नतास्तस्यै नमो नमः । नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ १३ ॥ या देवी सर्वभूतेषु विष्णुमायेति शब्दिता । नमस्तस्यै १४ नमस्तस्यै १५ नमस्तस्यै नमो नमः ॥ १६ ॥ या देवी सर्वभूतेषु चेतनेत्यभि-धीयते । नमस्तस्यै १७ नमस्तस्यै १८ नमस्तस्यै नमो नमः ॥१९॥ या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता । नमस्तस्यै २० नमस्तस्यै २१ नमस्तस्यै नमो नमः ॥ २२ ॥ या देवी सर्वभूतेषु निद्रारूपेण

संस्थता । नमस्तस्यै २३ नमस्तस्यै २४ नमस्तस्यै नमो नमः ॥ २५ ॥ या देवीसर्वभूतेषु क्षुधारूपेण संस्थिता । नमस्तस्यै २६ नमस्तस्यै २७ नमस्तस्यै नमो नमः ॥ २८ ॥ या देवी सर्वभूतेषु छायारूपेण संस्थिता नमस्तस्यै २९ नमस्तस्यै ३० नमस्तस्यै नमो नमः ॥ ३१ ॥ या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता । नमस्तस्यै ३२ नमस्तस्यै ३३ नमस्तस्यै नमो नमः ॥ ३४ ॥ या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता । नमस्तस्यै ३५ नमस्तस्यै ३६ नमस्तस्यै नमो नमः ॥ ३७ ॥ या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता । नमस्तस्यै ३८ नमस्तस्यै ॥ ३९ ॥ नमस्तस्यै नमो नमः ॥ ४० ॥ या देवी सर्वभूतेषु जातिरूपेण संस्थिता । नमस्तस्यै ॥ ४१ ॥ नमस्तस्यै ॥ ४२ ॥ नमस्तस्यै नमो नमः ॥ ४३ ॥ या देवी सर्वभूतेषु लज्जारूपेण संस्थिता । नमस्तस्यै ॥ ४४ ॥

नमस्तस्यै ॥ ४५ ॥ नमस्तस्यै नमो नमः ॥ ४६ ॥ या देवी
सर्वभूतेषु शान्तिरूपेण संस्थिता । नमस्तस्यै ॥ ४७ ॥ नमस्तस्यै
॥ ४८ ॥ नमस्तस्यै नमो नमः ॥४९॥ या देवी सर्वभूतेषु श्रद्धा-
रूपेण संस्थिता । नमस्तस्यै ॥५०॥ नमस्तस्यै ॥५१॥ नमस्तस्यै
नमो नमः ॥ ५२ ॥ या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता ।
नमस्तस्यै ॥ ५३ ॥ नमस्तस्यै ॥ ५४ ॥ नमस्तस्यै नमो नमः
॥५५॥ या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता । नमस्तस्यै ॥५६॥
नमस्तस्यै ॥५७॥ नमस्तस्यै नमो नमः ॥ ५८ ॥ या देवी सर्वभूतेषु
वृत्तिरूपेण संस्थिता । नमस्तस्यै ॥ ५९ ॥ नमस्तस्यै ॥ ६० ॥
नमस्तस्यै नमो नमः ॥ ६१ ॥ या देवी सर्वभूतेषु स्मृतिरूपेण
संस्थिता । नमस्तस्यै ॥ ६२ ॥ नमस्तस्यै ॥ ६३ ॥ नमस्तस्यै
नमो नमः ॥ ६४ ॥ या देवी सर्वभूतेषु दयारूपेण संस्थिता ।

नमस्तस्यै ।।६५।। नमस्तस्यै ।।६६।। नमस्तस्यै नमो नमः ।।६७।।
या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता । नमस्तस्यै ।। ६८ ।। नम-
स्तस्यै ।। ६९ ।। नमस्तस्यै नमो नमः ।।७०।।([1] या देवी सर्वभूतेषु
पुष्टिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ।।)
या देवी सर्वभूतेषु मातृरूपेण संस्थिता । नमस्तस्यै । ७१ ।। नम-
स्तस्यै ।। ७२ ।। नमस्तस्यै नमो नमः ।। ७३ ।। या देवी सर्वभूतेषु
भ्रान्तिरूपेण संस्थिता। नमस्तस्यै ।। ७४ ।। नमस्तस्यै । ७५ ।।
नमस्तस्यै नमो नमः ।।७६।। इन्द्रियाणामधिष्ठात्री भूतानाञ्चाऽखि-
लेषु या । भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः ।। ७७ ।।
चितिरूपेण या कृत्स्न-मेतद्व्याप्य स्थिता जगत् । नमस्तस्यै ।।७८।।
नमस्तस्यै ।। ७९ ।। नमस्तस्यै नमो नमः ।। ८० ।। स्तुता सुरैः

१. कोष्ठान्तर्गतः पाठः क्वचिन्नोपलभ्यते । तच्च साधुः, श्लोकांकरहितत्वात् ।।

पूर्वमभीष्टसंश्रयात् तथा सुरेन्द्रेण दिनेषु सेविता ॥ करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहन्तु चापदः ॥८१॥ या साम्प्रतञ्चोद्धत-दैत्यतापि-तैरस्माभिरीशा च सुरैर्नमस्यते ॥ या च स्मृता तत्क्षणमेव हन्ति नः सर्वापदो भक्ति-विनम्रमूर्त्तिभिः॥ ८२ ॥ ऋषिरुवाच ॥८३॥ एवं स्तवादियुक्तानां देवानां तत्र पार्वती । स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन ॥ ८४ ॥ साऽब्रवीत्तान् सुरान् सुभ्रूर्भवद्भिः स्तूयतेऽत्र का । शरीरकोशत-श्चास्याः समुद्भूताऽब्रवीच्छिवा ॥ ८५ ॥ स्तोत्रं ममैतत् क्रियते शुम्भदैत्य-निराकृतैः । देवैः समस्तैः समरे निशुम्भेन पराजितैः ॥८६॥ शरीर-कोशाद् यत्तस्याः पार्वत्या निःसृताम्बिका । कौशिकीति समस्तेषु ततो लोकेषु गीयते ॥८७॥ तस्यां विनिर्गतायां तु कृष्णाऽभूत् सापि पार्वती । कालिकेति समाख्याता हिमाचलकृताश्रया ॥८८॥ ततोऽम्बिकां परं

रूपं बिभ्राणां सुमनोहरम्। ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भ-नि-
शुम्भयोः ॥ ८९ ॥ ताभ्यां शुम्भाय चाख्याता अतीव सुमनोहरा ।
काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलम् ॥ ९० ॥ नैव तादृक्
क्वचिद् रूपं दृष्टं केनचिदुत्तमम् । ज्ञायतां काप्यसौ देवी गृह्यतां
चाऽसुरेश्वर ॥ ९१ ॥ स्त्रीरत्नमतिचार्वङ्गी द्योतयन्ती दिशस्त्विषा ।
सा तु तिष्ठति दैत्येन्द्र तां भवान् द्रष्टुमर्हति ॥९२॥ यानि रत्नानि
मणयो गजाऽश्वादीनि वै प्रभो । त्रैलोक्ये तु समस्तानि साम्प्रतं
भान्ति ते गृहे ॥ ९३ ॥ ऐरावतः समानीतो गजरत्नं पुरन्दरात् ।
पारिजात-तरुश्चाऽयं तथैवोच्चैःश्रवा हयः ॥ ९४ ॥ विमानं
हंससंयुक्त-मेतत् तिष्ठति तेऽङ्गणे । रत्नभूतमिहाऽऽनीतं यदासीद्
वेधसोऽद्भुतम् ॥ ९५ ॥ निधिरेष महापद्मः समानीतो धनेश्वरात् ।
किञ्जल्किनीं ददौ चाब्धि-र्मालामम्लान-पङ्कजाम् ॥ ९६ ॥ छत्रन्ते

वारुणं गेहे काञ्चनस्रावि तिष्ठति । तथाऽयं स्यन्दनवरो यः पुरासीत् प्रजापतेः ॥ ९७ ॥ मृत्योरुत्क्रान्तिदा नाम शक्तिरीश त्वया हृता । पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥९८॥ निशुम्भ-स्याऽब्धि-जाताश्च समस्ता रत्नजातयः । वह्निरपि ददौ तुभ्य-मग्निशौचे च वाससी ॥ ९९ ॥ एवं दैत्येन्द्र रत्नानि समस्तान्या-हृतानि ते । स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ॥ १०० ॥ ऋषिरुवाच ॥१०१॥ निशम्येति वचः शुम्भः स तदा चण्डमुण्डयोः । प्रेषयामास सुग्रीवं दूतं देव्या महासुरः ॥ १०२ ॥ इति चेति च वक्तव्या सा गत्वा वचनान्मम । यथा चाभ्येति सम्प्रीत्या तथा कार्यं त्वया लघु ॥ १०३ ॥ (ऋषिरुवाच) स तत्र गत्वा यत्रास्ते शैलोद्देशेऽति-शोभने । ताञ्च देवीं ततः प्राह श्लक्ष्णं मधुरया गिरा ॥१०४॥ दूत उवाच ॥१०५॥ देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः । दूतोऽहं

प्रेषितस्तेन त्वत्सकाश-मिहागतः ॥ १०६ ॥ अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु । निर्जिताऽखिलदैत्यारिः स यदाह शृणुष्व तत् ॥ १०७ ॥ मम त्रैलोक्यमखिलं मम देवा वशानुगाः । यज्ञ-भागानहं सर्वाऽनुपाश्नामि पृथक् पृथक् ॥ १०८ ॥ त्रैलोक्ये वर-रत्नानि मम वश्यान्यशेषतः । तथैव गजरत्नानि हृत्वा देवेन्द्रवाह-नम् ॥ १०९ ॥ क्षीरोद-मथनोद्भूत-मश्वरत्नं ममामरैः । उच्चैः-श्रवससंज्ञं तत्प्रणिपत्य समर्पितम् ॥ ११० ॥ यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च । रत्नभूतानि भूतानि तानि मय्येव शोभने ॥१११॥ स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् । सा त्वमस्मा-नुपागच्छ यतो रत्नभुजो वयम् ॥ ११२ ॥ मां वा ममाऽनुजं वापि निशुम्भ-मुरुविक्रमम् । भज त्वं चञ्चलापाङ्गि रत्नभूतासि वै यतः ॥ ११३ ॥ परमैश्वर्य-मतुलं प्राप्स्यसे मत्परिग्रहात् । एतद् बुद्ध्या

समालोच्य मत्परिग्रहतां व्रज ॥ ११४ ॥ ऋषिरुवाच ॥ ११५ ॥
इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ । दुर्गा भगवती
भद्रा ययेदं धार्यते जगत् ॥११६॥ देव्युवाच ॥११७॥ सत्यमुक्तं
त्वया नाऽत्र मिथ्या किञ्चित् त्वयोदितम् । त्रैलोक्यस्याऽधिपतिः
शुम्भो निशुम्भश्चापि तादृशः ॥ ११८ ॥ किन्त्वत्र यत् प्रतिज्ञातं
मिथ्या तत्क्रियते कथम् । श्रूयतामल्प-बुद्धित्वात् प्रतिज्ञा या कृता
पुरा ॥ ११९ ॥ यो मां जयति संग्रामे यो मे दर्पं व्यपोहति । यो
मे प्रतिबलो लोके स मे भर्त्ता भविष्यति ॥१२०॥ तदाऽऽगच्छतु
शुम्भोऽत्र निशुम्भो वा महासुरः । मां जित्वा किं चिरेणाऽत्र पाणिं
गृह्णातु मे लघु ॥ १२१ ॥ दूत उवाच ॥ १२२ ॥ अवलिप्ताऽसि
मैवं त्वं देवि ब्रूहि ममाग्रतः । त्रैलोक्ये कः पुमान् तिष्ठे-दग्रे शुम्भ-
निशुम्भयोः ॥ १२३ ॥ अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ।

तिष्ठन्ति सम्मुखे देवि किम्पुनः स्त्री त्वमेकिका ॥१२४॥ इन्द्राद्याः सकला देवाः तस्थुर्येषान्न संयुगे । शुम्भादीनां कथन्तेषां स्त्री प्रयास्यसि सम्मुखम् ॥ १२५ ॥ सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भ-निशुम्भयोः । केशाकर्षण-निर्धूत-गौरवा मा गमिष्यसि ॥ १२६ ॥ देव्युवाच ॥१२७॥ एवमेतद् बली शुम्भो निशुम्भ-श्चाऽतिवीर्यवान् । किङ्करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥ १२८ ॥ स त्वङ्गच्छ मयोक्तं ते यदेतत् सर्वमादृतः । तदाचक्ष्वाऽसुरेन्द्राय स च युक्तं रोतु यत् ॥ १२९ ॥

(इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये दूतवाक्यम् ॥ ५ ॥)

(अथ षष्ठोऽध्यायः)

ऋषिरुवाच ॥१॥ इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः। समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥ २ ॥ तस्य दूतस्य तद्वाक्य-माकर्ण्याऽसुरराट् ततः। सक्रोधः प्राह दैत्याना-मधिपं धूम्रलोचनम् ॥ ३ ॥ हे धूम्रलोचनाऽऽशु त्वं स्वसैन्य-परिवारितः। तामानय बलाद् दुष्टां केशाकर्षण-विह्वलाम् ॥ ४ ॥ तत्परित्राणदः कश्चिद् यदि वोत्तिष्ठतेऽपरः। स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव वा ॥ ५ ॥ ऋषिरुवाच ॥ ६ ॥ तेनाऽऽज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः। वृतः षष्ट्या सहस्राणा-मसुराणां द्रुतं ययौ ॥ ७ ॥ स दृष्ट्वा तां ततो देवीं तुहिनाऽचलसंस्थिताम्। जगादोच्चैः प्रयाहीति मूलं शुम्भ-निशुम्भयोः ॥८॥ न चेत् प्रीत्याद्य भवती मद्भर्तारमुपै-

ष्यति । ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ॥ ९ ॥ देव्युवाच ॥ १० ॥ दैत्येश्वरेण प्रहितो बलवान् बलसंवृतः । बलान्नयसि मामेवं ततः किन्ते करोम्यहम् ॥ ११ ॥ ऋषिरुवाच ॥ १२ ॥ इत्युक्तः सोऽभ्यधावत्ता-मसुरो धूम्रलोचनः । हुङ्कारेणैव तं भस्म सा चकाराऽम्बिका ततः ॥ १३ ॥ अथ क्रुद्धं महासैन्य-मसुराणां तथा-म्बिका । ववर्ष सायकैस्तीक्ष्णैः तथा शक्तिपरश्वधैः ॥ १४ ॥ ततो धुतसटः कोपात् कृत्वा नादं सुभैरवम् । पपाताऽसुरसेनायां सिंहो देव्याः स्ववाहनः ॥ १५ ॥ काँश्चित् करप्रहारेण दैत्यानास्येन चापरान् । आक्रान्त्या चाधरेणाऽन्यान् जघानाशु महासुरान् ॥१६॥ केषाञ्चित् पाटयामास नखैः कोष्ठानि केसरी । तथा तलप्रहारेण शिरांसि कृतवान् पृथक् ॥ १७ ॥ विच्छिन्न-बाहुशिरसः कृतास्तेन तथाऽपरे । पपौ च रुधिरं कोष्ठा-दन्येषां धुतकेसरः ॥१८॥ क्षणेन

तद् बलं सर्वं क्षयन्नीतं महात्मना । तेन केसरिणा देव्या वाहनेना-
तिकोपिना ॥१९॥ श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम् । बलं
च क्षयितं कृत्स्नं देवीकेसरिणा ततः ॥२०॥ चुकोप दैत्याधिपतिः
शुम्भः प्रस्फुरिताधरः । आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ
॥ २१ ॥ हे चण्ड हे मुण्ड बलैर्बहुलैः परिवारितौ । तत्र गच्छत
गत्वा च, सा समानीयतां लघु ॥२२॥ केशेष्वाऽऽकृष्य बद्ध्वा वा
यदि वः संशयो युधि । तदाऽशेषायुधैः सर्वै-रसुरै-र्विनिहन्यताम्
॥२३॥ तस्यां हतायां दुष्टायां सिंहे च विनिपातिते । शीघ्रमागम्य
तां बध्वा गृहीत्वा तामथाऽम्बिकाम् ॥ २४ ॥

(इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
धूम्रलोचनवधः ॥ ६ ॥)

(अथ सप्तमोऽध्यायः)

ऋषिरुवाच ॥ १ ॥ आज्ञप्तास्ते ततो दैत्याः चण्ड-मुण्ड-पुरोगमाः । चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः ॥ २ ॥ ददृशुस्ते ततो देवी-मीषद्धासां व्यवस्थिताम् । सिंहस्योपरि शैलेन्द्र-शृङ्गे महति काञ्चने ॥ ३ ॥ ते दृष्ट्वा तां समादातु-मुद्यमं चक्रुरुद्यताः । आकृष्ट-चापासिधराः तथान्ये तत्समीपगाः ॥ ४ ॥ ततः कोपं चकारोच्चै-रम्बिका तानरीन् प्रति । कोपेन चाऽस्या वदनं मसीवर्णमभूत् तदा ॥ ५ ॥ भ्रुकुटीकुटिलात् तस्या ललाट-फलकाद् द्रुतम् । काली करालवदना विनिष्क्रान्ताऽसिपाशिनी ॥ ६ ॥ विचित्र-खट्वाङ्गधरा नरमाला-विभूषणा । द्वीपिचर्म-परीधाना शुष्कमांसातिभैरवा ॥७॥ अतिविस्तारवदना जिह्वाललनभीषणा । निमग्ना रक्तनयना नादा-

पूरित-दिङ्मुखा ॥८॥ सा वेगेनाऽभिपतिता घातयन्ती महासुरान्। सैन्ये तत्र सुरारीणा-मभक्षयत तद्बलम् ॥ ९ ॥ पार्ष्णिग्राहाऽङ्कुश-ग्राहि-योधघण्टा-समन्वितान् । समादायैकहस्तेन मुखे चिक्षेप वारणान् ॥ १० ॥ तथैव योधं तुरगै रथं सारथिना सह । निःक्षिप्य वक्त्रे दशनैः चर्वयन्त्यतिभैरवम् ॥ ११ ॥ एकञ्जग्राह केशेषु ग्रीवायामथ चापरम्। पादेनाऽऽक्रम्य चैवान्य-मुरसान्य-मपोथयत् ॥१२॥ तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथाऽसुरैः । मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥ १३ ॥ बलिनां तद्बलं सर्व-मसुराणां दुरात्मनाम् । ममर्दाऽभक्षयच्चान्या-नन्याँश्चाऽताडयत् तदा ॥१४॥ असिना निहताः केचित्, केचित् खट्वाङ्गताडिताः । जग्मुर्विनाश-मसुरा दन्ताग्राभिहतास्तथा ॥ १५ ॥ क्षणेन तद्बलं सर्व-मसुराणां निपातितम् । दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीषणाम् ॥१६॥

शरवर्षैर्महाभीमै-र्भीमाक्षीं तां महासुरः। छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः ॥ १७ ॥ तानि चक्राण्यनेकानि विशमानानि तन्मुखम्। बभुर्यथार्कबिम्बानि सुबहूनि घनोदरम् ॥ १८ ॥ ततो जहासाऽतिरुषा भीमं भैरवनादिनी। काली करालवक्त्रान्त-दुर्दर्श-दशनोज्ज्वला ॥ १९ ॥ उत्थाय च महासिंहाद् देवी चण्डमधावत। गृहीत्वा चास्य केशेषु शिरस्तेनाऽसिनाऽच्छिनत् ॥ २० ॥ अथ मुण्डोऽप्यधावत्तां दृष्ट्वा चण्डन्निपातितम्। तमप्यपातयद् भूमौ सा खड्गाभिहतं रुषा ॥२१॥ हतशेषं ततः सैन्यं दृष्ट्वा चण्डन्निपातितम्। मुण्डञ्च सुमहावीर्यं दिशो भेजे भयातुरम् ॥ २२ ॥ शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च। प्राह प्रचण्डाट्टहास-मिश्रमभ्येत्य चण्डिकाम् ॥ २३ ॥ मया तवाऽत्रोपहृतौ चण्डमुण्डौ महापशू। युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि ॥ २४ ॥ ऋषिरुवाच

॥ २५ ॥ तावाऽऽनीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ । उवाच
काली कल्याणी ललितं चण्डिका वचः ॥२६॥ यस्माच्चण्डञ्च मुण्डं
च गृहीत्वा त्वमुपागता । चामुण्डेति ततो लोके ख्याता देवि
भविष्यसि ॥ २७ ॥

(इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये चण्डमुण्डवधः ॥ ७ ॥)

(अथ अष्टमोऽध्यायः)

ऋषिरुवाच ।। १ ।। चण्डे च निहते दैत्ये मुण्डे च विनिपातिते बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ।।२।। ततः कोपपराधीनचेताः शुम्भः प्रतापवान् । उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ।। ३ ।। अद्य सर्वबलैर्दैत्याः षडशीति-रुदायुधाः । कम्बूनां चतुरशीति-निर्यान्तु स्वबलैर्वृताः ।। ४ ।। कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै । शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ।। ५ ।। कालका दौर्हृदा मौर्याः कालकेया-स्तथाऽसुराः । युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ।। ६ ।। इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः । निर्जगाम महासैन्य-सहस्रैर्बहुभिर्वृतः ।। ७ ।। आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् । ज्यास्वनैः

पूरयामास धरणीगगनान्तरम् ॥ ८ ॥ ततः सिंहो महानाद-मतीव कृतवान् नृप । घण्टास्वनेन तान्नादा-नम्बिका चोपबृंहयत् ॥ ९ ॥ धनुर्ज्या-सिंहघण्टानां नादापूरित-दिङ्मुखा । निनादै-र्भीषणैः काली जिग्ये विस्तारिताऽऽनना ॥ १० ॥ [1]तन्निनाद-मुपश्रुत्य दैत्यसैन्यै-श्चतुर्दिशम् । देवी सिंहस्तथा काली सरोषैः परिवारिताः ॥ ११ ॥ एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् । भवायामरसिंहाना-मति-वीर्यबलान्विताः ॥ १२ ॥ ब्रह्मेशगुह-विष्णूनां तथेन्द्रस्य च शक्तयः । शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥ १३ ॥ यस्य देवस्य यद्रूपं यथा भूषणवाहनम् । तद्वदेव हि तच्छक्ति-रसुरान् योद्धु-माययौ ॥ १४ ॥ हंसयुक्त-विमानाग्रे साक्षसूत्र-कमण्डलुः । आयाता ब्रह्मणः शक्ति-र्ब्रह्माणी साभिधीयते ॥ १५ ॥ माहेश्वरी वृषारूढा त्रिशूल-वरधारिणी । महाहि-वलया प्राप्ता चन्द्ररेखा-विभूषणा

१. "तान्निदानानुपश्रुत्य" इति पाठः ।

॥१६॥ कौमारी शक्तिहस्ता च मयूर-वरवाहना । योद्धुमभ्याययौ
दैत्यानम्बिका गुहरूपिणी ॥१७॥ तथैव वैष्णवी शक्ति-र्गरुडोपरि
संस्थिता । शङ्ख-चक्र-गदा-शार्ङ्ग-खड्ग-हस्ताऽभ्युपाययौ ॥ १८ ॥
यज्ञवाराह-मतुलं रूपं या बिभ्रतो हरेः । शक्तिः साप्याययौ तत्र
वाराहीं बिभ्रती तनुम् ॥१९॥ नारसिंही नृसिंहस्य बिभ्रती सदृशं
वपुः । प्राप्ता तत्र सटाक्षेप-क्षिप्तनक्षत्र-संहतिः ॥ २० ॥ वज्रहस्ता
तथैवैन्द्री गजराजोपरि स्थिता । प्राप्ता सहस्रनयना यथा शक्रस्त-
थैव सा ॥ २१ ॥ ततः परिवृतस्ताभि-रीशानो देवशक्तिभिः ।
हन्यन्तामसुराः शीघ्रं मम प्रीत्याऽऽह चण्डिकाम् ॥२२॥ ततो देवी-
शरीरात्तु विनिष्क्रान्ताऽतिभीषणा । चण्डिकाशक्तिरत्युग्रा शिवा-
शतनिनादिनी ॥ २३ ॥ सा चाह धूम्रजटिल-मीशानमपराजिता ।
दूत त्वङ्गच्छ भगवन् पार्श्वं शुम्भ-निशुम्भयोः ॥ २४ ॥ ब्रूहि शुम्भं

निशुम्भश्च दानवाऽत्रतिगर्विंतौ । ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥ २५ ॥ त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः । यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥ २६ ॥ बलावलेपादथ चेद् भवन्तो युद्धकाङ्क्षिणः । तदाऽऽगच्छत तृप्यन्तु मच्छिवाः पिशितेन वः ॥ २७ ॥ यतो नियुक्तो दैत्येन तया देव्या शिवः स्वयम् । शिवदूतीति लोकेऽस्मिँ-स्ततः सा ख्यातिमागता ॥ २८ ॥ तेऽपि श्रुत्वा वचो देव्याः सर्वाख्यातं महासुराः । अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता ॥ २९ ॥ ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः । ववर्षु-रुद्धतामर्षाः तां देवीममरारयः ॥३०॥ सा च तत्प्रहितान् बाणान् शूल-शक्ति-परश्वधान् । चिच्छेद लीलयाऽऽध्मातधनुर्मुक्तै-र्महेषुभिः ॥ ३१ ॥ तस्याग्रतस्तथा काली शूलपातविदारितान् । खट्वाङ्गपोथितांश्चारीन् कुर्वती व्यचरत्तदा ॥३२॥ कम-

ण्डलुजलाक्षेप-हतवीर्यान् हतौजसः । ब्रह्माणी चाऽकरोच्छत्रून् येन येन स्म धावति ॥३३॥ माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी । दैत्याञ्जघान कौमारी तथा शक्त्याऽतिकोपना ॥ ३४ ॥ ऐन्द्री-कुलिशपातेन शतशो दैत्यदानवाः । पेतुर्विदारिताः पृथ्व्यां रुधिरौघ-प्रवर्षिणः ॥ ३५ ॥ तुण्डप्रहार-विध्वस्ता दंष्ट्राग्रक्षत-वक्षसः । वराह-मूर्त्या न्यपतँ-श्चक्रेण च विदारिताः ॥ ३६ ॥ नखैर्विदारिताँश्चा-न्यान् भक्षयन्ती महासुरान् । नारसिंही चचाराजौ नादापूर्ण-दिगम्बरा ॥३७॥ चण्डाऽट्टहासैरसुराः शिवदूत्यभिदूषिताः । पेतुः पृथिव्यां पतिताँ-स्ताँश्चखादाथ सा तदा ॥ ३८ ॥ इति मातृगणं क्रुद्धं मर्दयन्तं महासुरान् । दृष्ट्वाऽभ्युपायैर्विविधै-र्नेशुर्देवारि-सैनिकाः ॥ ३९ ॥ पलायनपरान् दृष्ट्वा दैत्यान् मातृगणार्दितान् । योद्धुम-भ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥ ४० ॥ रक्तबिन्दुर्यदा भूमौ

पतत्यस्य शरीरतः । समुत्पतति मेदिन्यां तत्प्रमाणस्तदाऽसुरः ।।४१।।
युयुधे स गदापाणि-रिन्द्रशक्त्या महासुरः । ततश्चैन्द्री स्ववज्रेण
रक्तबीजमताडयत् ।। ४२ ।। कुलिशेनाहतस्याशु तस्य सुस्राव
शोणितम् । समुत्तस्थुस्ततो योधाः, तद्रूपाः तत्पराक्रम : ।। ४३ ।।
यावन्तः पतितास्तस्य शरीराद् रक्तबिन्दवः । तावन्तः पुरुषा
जाताः तद्वीर्य-बल-विक्रमाः ।। ४४ ।। ते चापि युयुधुस्तत्र पुरुषा
रक्तसम्भवाः । समं मातृभिरत्युग्रं शस्त्रपाताऽतिभीषणम् ।। ४५ ।।
पुनश्च वज्रपातेन क्षतमस्य शिरो यदा । ववाह रक्तं पुरुषाः ततो
जाताः सहस्रशः ।।४६।। वैष्णवी समरे चैनं चक्रेणाऽभिजघान ह ।
गदया ताडयामास ऐन्द्री तमसुरेश्वरम् ।।४७।। वैष्णवी-चक्रभिन्नस्य
रुधिरस्राव-सम्भवैः । सहस्रशो जगद्व्याप्तं तत्प्रमाणै-र्महासुरैः ।।४८।।
शक्त्या जघान कौमारी वाराही च तथासिना । माहेश्वरी त्रिशूलेन

रक्तबीजं महासुरम् ॥४९॥ स चापि गदया दैत्यः सर्वा एवाऽहनत्
पृथक् । मातृः कोपसमाविष्टो रक्तबीजो महासुरः ॥ ५० ॥ तस्या-
हतस्य बहुधा शक्तिशूलादिभिर्भुवि । पपात यो वै रक्तौघः तेना-
ऽसञ्छतशोऽसुराः ॥५१॥ तैश्चासुरासृक्सम्भूतै-रसुरैः सकलं जगत् ।
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥ ५२ ॥ तान् विषण्णान्
सुरान् दृष्ट्वा चण्डिका प्राह सत्वरम् । उवाच कालीं चामुण्डे विस्तरं
वदनं कुरु ॥ ५३ ॥ मच्छस्त्रपातसंभूतान् रक्तबिन्दून् महासुरान् ।
रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणाऽनेन वेगिना ॥ ५४ ॥ भक्षयन्ती
चर रणे तदुत्पन्नान् महासुरान् । एवमेष क्षयन्दैत्यः क्षीणरक्तो गमि-
ष्यति ॥ ५५ ॥ भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ।
इत्युक्त्वा तां ततो देवी शूलेनाऽभिजघान तम् ॥ ५६ ॥ मुखेन
काली जगृहे रक्तबीजस्य शोणितम् । ततोऽसावाजघानाथ गदया

तत्र चण्डिकाम् ॥५७॥ न चास्या वेदनाञ्चक्रे गदापातोऽल्पिकामपि ।
तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ॥ ५८ ॥ यतस्ततस्त-
द्वक्त्रेण चामुण्डा सम्प्रतीच्छति । मुखे समुद्गता येऽस्या रक्तपातां
महासुराः ॥५९॥ ताँश्चखादाथ चामुण्डा पपौ तस्य च शोणितम् ।
देवी शूलेन वज्रेण बाणैरसिभिर्ऋष्टिभिः ॥ ६० ॥ जघान रक्त-
बीजन्तं चामुण्डापीतशोणितम् । स पपात महीपृष्ठे शस्त्रसंघ-
समाहतः ॥६१॥ नीरक्तश्च महीपाल रक्तबीजो महासुरः । ततस्ते
हर्षमतुल-मवापुस्त्रिदशा नृप ॥६२॥ तेषां मातृगणो जातो ननर्ता-
ऽसृङ्-मदोद्धतः ॥ ६३ ॥

(इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
रक्तबीजवधः ॥ ८ ॥)

—◌*◌—

(अथ नवमोऽध्यायः)

राजोवाच ॥ १ ॥ विचित्रमिदमाख्यातं भगवन् भवता मम । देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् ॥ २ ॥ भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते । चकार शुम्भो यत्कर्म निशुम्भश्चाऽतिकोपनः ॥ ३ ॥ ऋषिरुवाच ॥ ४ ॥ चकार कोपमतुलं रक्तबीजे निपातिते । शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ॥ ५ ॥ हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् । अभ्यधावन् निशुम्भोऽपि मुख्यया सुरसेनया ॥६॥ तस्याऽग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः । सन्दष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ॥७॥ आजगाम महावीर्यः शुम्भोऽपि स्वबलैर्वृतः । निहन्तुं चण्डिकां कोपात् कृत्वा युद्धन्तु मातृभिः ॥ ८ ॥ ततो युद्धमतीवासीद् देव्याः शुम्भनि-

शुम्भयोः । शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ॥९॥ चिच्छेदाऽस्ता-ञ्छरांस्ताभ्यां चण्डिका स्वशरोत्करैः । ताडयामास चाङ्गेषु शस्त्रो-घैरसुरेश्वरौ ॥१०॥ निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम् । अताडन् मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ॥ ११ ॥ ताडिते वाहने देवी क्षुरप्रेणाऽसिमुत्तमम् । निशुम्भस्याशु चिच्छेद चर्म चाप्यष्ट-चन्द्रकम् ॥ १२ ॥ छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः । तामप्यस्य द्विधा चक्रे चक्रेणाऽभिमुखागताम् ॥ १३ ॥ कोपाध्मातो निशुम्भोऽथ शूलं जग्राह दानवः । आयातं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ॥ १४ ॥ आविध्याथ गदां सोऽपि चिक्षेप चण्डिकां प्रति । साऽपि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता ॥१५॥ ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम् । आहत्य देवी बाणौघै-रपातयत भूतले ॥१६॥ तस्मिन् निपतिते भूमौ निशुम्भे भीमविक्रमे । भ्रातर्य-

तीव संक्रुद्धः प्रयय हन्तुमाम्बिकाम् ।।१७।। स रथस्थः तथाऽत्युच्चै-
र्गृहीतपरमायुधैः । भुजैरष्टाभिरतुलै-र्व्याप्याशेषं बभौ नभः ।।१८।।
तमायान्तं समालोक्य देवी शङ्खमवादयत् । ज्याशब्दञ्चापि धनुषः
चकारातीव दुःसहम् ।। १९ ।। पूरयामास ककुभो निजघण्टास्वनेन
च । समस्तदैत्यसैन्यानां तेजोवधविधायिना ।। २० ।। ततः सिंहो
महानादैः त्याजितेभ-महामदैः । पूरयामास गगनं गां तथोपदिशो
दश ।। २१ ।। ततः काली समुत्पत्य गगनं क्ष्मामताडयत् । कराभ्यां
तन्निनादेन प्राक् स्वनास्ते तिरोहिताः ।। २२ ।। अट्टाट्टहासमशिवं
शिवदूती चकार ह । तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ
।। २३ ।। दुरात्मन् तिष्ठ तिष्ठेति व्याजहाराऽम्बिका यदा । तदा
जयेत्यभिहितं देवैराकाशसंस्थितैः ।। २४ ।। शुम्भेनागत्य या
शक्ति-र्मुक्ता ज्वालाऽतिभीषणा । आयान्ती वह्निकूटाभा सा निरस्ता

महोल्कया ॥ २५ ॥ सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम् । निर्घातनिःस्वनो घोरो जितवानवनीपते ॥२६॥ शुम्भमुक्ताञ्छरान् देवी शुम्भस्तत्प्रहिताञ्छरान् । चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः ॥ २७॥ ततः सा चण्डिका क्रुद्धा शूलेनाऽभिजघान तम् । स तदाभिहतो भूमौ मूर्च्छितो निपपात ह ॥ २८ ॥ ततो निशुम्भः सम्प्राप्य चेतनामात्तकार्मुकः । आजघान शरैर्देवीं कालीं केसरिणं तथा ॥ २९ ॥ पुनश्च कृत्वा बाहूना-मयुतं दनुजेश्वरः । चक्रायुधेन दितिज-श्छादयामास चण्डिकाम् ॥ ३० ॥ ततो भगवती क्रुद्धा दुर्गा दुर्गार्त्तिनाशिनी । चिच्छेद तानि चक्राणि स्वशरैः सायकाँश्च तान् ॥ ३१ ॥ ततो निशुम्भो वेगेन गदामादाय चण्डिकाम् । अभ्यधावत वै हन्तुं दैत्यसेनासमावृतः ॥ ३२ ॥ तस्यापतत एवाशु गदां चिच्छेद चण्डिका । खड्गेन शितधारेण स च शूलं समाददे

॥ शूलहस्तं तमायान्तं निशुम्भममरार्दनम् । हृदि विव्याध शूलेन वेगाऽऽविद्धेन चण्डिका ॥ ३४ ॥ भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः । महाबलो महावीर्य-स्तिष्ठेति पुरुषो वदन् ॥ ३५ ॥ तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः । शिरश्चिच्छेद खड्गेन ततोऽसावपतद् भुवि ॥ ३६ ॥ ततः सिंहश्चखादोग्रं दंष्ट्राक्षुण्णशिरोधरान् । असुरांस्तांस्तथा काली शिवदूती तथाऽपरान् ॥ ३७ ॥ कौमारी शक्ति-निर्भिन्नाः केचिन्नेशुर्महासुराः । ब्रह्माणी-मन्त्रपूतेन तोयेनाऽन्ये निराकृताः ॥ ३८ ॥ माहेश्वरी-त्रिशूलेन भिन्नाः पेतुस्तथाऽपरे । वाराही-तुण्डघातेन केचित् चूर्णी कृता भुवि ॥ ३९ ॥ खण्डं खण्डं च चक्रेण वैष्णव्या दानवाः कृताः । वज्रेण चैन्द्री-हस्ताग्र-विमुक्तेन तथाऽपरे ॥ ४० ॥ केचिद् विनेशुरसुराः केचिन्नष्टा महाहवात् । भक्षिताश्चाऽपरे काली-शिवदूती-मृगाधिपैः ॥ ४१ ॥

(इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये निशुम्भवधः ॥ ९ ॥)

(अथ दशमोऽध्यायः)

ऋषिरुवाच ॥१॥ निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसम्मितम् । हन्यमानं बलं चैव शुम्भः क्रुद्धोऽब्रवीद् वचः ॥ २ ॥ बलावलेपाद् दुष्टे त्वं मा दुर्गे गर्वमावह । अन्यासां बलमाश्रित्य युध्यसे याऽतिमानिनी ॥ ३ ॥ देव्युवाच ॥४॥ एकैवाहं जगत्यत्र द्वितीया का ममाऽपरा । पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ॥ ५ ॥ (ऋषिरुवाच) ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम् । तस्या देव्यास्तनौ जग्मु-रेकैवासीत् तदाऽम्बिका ॥ ६ ॥ देव्युवाच ॥७॥ अहं विभूत्या बहुभि-रिह रूपैर्यदास्थिता । तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥८॥ ऋषिरुवाच ॥९॥ ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः । पश्यतां सर्वदेवाना-मसुराणाञ्च दारुणम् ॥१०॥

शरवर्षैः शितैः शस्त्रैः तथास्त्रैश्चैव दारुणैः । तयोर्युद्धमभूद् भूयः सर्वलोकभयङ्करम् ॥११॥ दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाऽम्बिका । बभञ्ज तानि दैत्येन्द्रः तत्प्रतीघातकर्तृभिः ॥ १२ ॥ मुक्तानि तेन चाऽस्त्राणि दिव्यानि परमेश्वरी । बभञ्ज लीलयैवोग्रं हुङ्कारोच्चारणादिभिः॥१३॥ ततः शरशतैर्देवी-माच्छादयत सोऽसुरः। साऽपि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥ १४॥ छिन्ने धनुषि दैत्येन्द्रः तथा शक्तिमथाऽऽददे । चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ॥ १५ ॥ ततः खड्गमुपादाय शतचन्द्रं च भानुमत् । अभ्यधावत्तदा देवीं दैत्यानामधिपेश्वरः ॥ १६ ॥ तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका । धनुर्मुक्तैः शितैर्बाणै-श्चर्म चार्ककरामलम् ॥ १७ ॥ हताश्वः स तदा दैत्य-श्छिन्नधन्वा विसारथिः । जग्राह मुद्गरं घोर-मम्बिका निधनोद्यतः ॥ १८ ॥ चिच्छेदापततस्तस्य

मुद्गरं निशितैः शरैः। तथाऽपि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेग-
वान् ॥१९॥ स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः। देव्यास्तं चापि
सा देवी तलेनोरस्यताडयत् ॥ २० ॥ तलप्रहाराभिहतो निपपात
महीतले। स दैत्यराजः सहसा पुनरेव तथोत्थितः ॥२१॥ उत्पत्य
च प्रगृह्योच्चै-र्देवीङ्गगनमास्थितः। तत्रापि सा निराधारा युयुधे तेन
चण्डिका ॥ २२ ॥ नियुद्धं खे तदा दैत्य-श्चण्डिका च परस्परम्।
चक्रतुः प्रथमं युद्धं मुनिविस्मयकारकम् ॥ २३ ॥ ततो नियुद्धं सुचिरं
कृत्वा तेनाम्बिका सह। उत्पाट्य भ्रामयामास चिक्षेप धरणीतले
॥ २४ ॥ स क्षिप्तो धरणीम्प्राप्य मुष्टिमुद्यम्य वेगितः। अभ्यधावत
दुष्टात्मा चण्डिकानिधनेच्छया ॥२५॥ तमायान्तं ततो देवी सर्व-
दैत्यजनेश्वरम्। जगत्यां पातयामास भित्त्वा शूलेन वक्षसि ॥ २६ ॥
स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः। चालयन् सकलां पृथ्वीं

साब्धिद्वीपां सपर्वताम् ॥ २७ ॥ ततः प्रसन्नमखिलं हते तस्मिन्
दुरात्मनि । जगत्स्वास्थ्यमतीवाप निर्मलं चाऽभवन्नभः ॥ २८ ॥
उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः । सरितो मार्गवाहिन्यः
तथाऽसंस्तत्र पातिते ॥२९॥ ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ।
बभूवुर्निहते तस्मिन् गन्धर्वा ललितञ्जगुः ॥३०॥ अवादयँस्तथैवान्ये
ननृतुश्चाप्सरोगणाः । ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः
॥ ३१ ॥ जज्वलुश्चाग्नयः शान्ताः शान्तदिग्जनितस्वनाः
॥ ३२ ॥

(इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
शुम्भवधः ॥१०॥)

(अथ एकादशोऽध्यायः)

ऋषिरुवाच ॥ १ ॥ देव्या हते तत्र महासुरेन्द्रे सेन्द्राः सुरा महिपुरोगमास्ताम् । कात्यायनीं तुष्टुवुरिष्टलाभाद् विकाशिवक्त्राब्जविकाशिताशाः ॥ २ ॥ (देवा ऊचुः) देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य । प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥ ३ ॥ आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थिताऽसि । अपां स्वरूपस्थितया त्वयैत-दाप्यायते कृत्स्नमलङ्घ्यवीर्ये ॥ ४ ॥ त्वं वैष्णवी शक्तिरनन्तवीर्या विश्वस्य बीजं परमाऽसि माया । सम्मोहितं देवि समस्तमेतत् त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥ ५ ॥ विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु । त्वयैकया पुरितमम्बयैतत्-का ते स्तुतिः

स्तव्यपराऽपरोक्तिः ॥ ६ ॥ सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी । त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥ ७ ॥ सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते । स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥ ८ ॥ कलाकाष्ठादिरूपेण परिणामप्रदायिनि । विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ॥ ९ ॥ सर्वमङ्गलमाङ्गल्ये[1] शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥१०॥ सृष्टिस्थिति-विनाशानां शक्तिभूते सनातनि । गुणाश्रये-गुणमये नारायणि नमोऽस्तु ते ॥ ११ ॥ शरणागतदीनार्त-परित्राणपरायणे । सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥ १२ ॥ हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि । कौशाम्भःक्षरिके देवि नारायणि नमोऽस्तु ते ॥१३॥ त्रिशूलचन्द्राहिधरे महावृषभवाहिनि ।

१. 'सर्वमङ्गलमङ्गल्ये' इति पाठान्तरम् ।

माहेश्वरीस्वरूपेण नारायाणि नमोऽस्तु ते ॥ १४ ॥ मयूरकुक्कुट-वृते महाशक्तिधरेऽनघे । कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते ॥ १५ ॥ शङ्ख-चक्र-गदाशार्ङ्ग-गृहीतपरमायुधे । प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते ॥१६॥ गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे । वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ॥१७॥ नृसिंहरूपेणोग्रेण हन्तुं दैत्यान् कृतोद्यमे । त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ॥ १८ ॥ किरीटिनि महावज्रे सहस्रनयनोज्ज्वले । वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते ॥ १९ ॥ शिवदूतीस्वरूपेण हतदैत्य-महाबले । घोररूपे महारावे नारायणि नमोऽस्तु ते ॥ २० ॥ दंष्ट्राकरालवदने शिरोमालाविभूषणे । चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ॥ २१ ॥ लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे । महारात्रि महाविद्ये नारायणि नमोऽस्तु ते ॥ २२ ॥ मेधे सरस्वति

वरे भूति बाभ्रवि तामसि । नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते ॥ २३ ॥ (सर्वतः[1] पाणिपादान्ते सर्वतोऽक्षिशिरोमुखे । सर्वतः श्रवणघ्राणे नारायणि नमोऽस्तु ते ॥) सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥ २४ ॥ एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् । पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते ॥ २५ ॥ ज्वालाकरालमत्युग्र-मशेषासुरसूदनम् । त्रिशूलं पातु नोभीते-र्भद्रकालि नमोऽस्तु ते ॥ २६ ॥ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् । सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव ॥ २७ ॥ असुरासृग्वसापङ्क-चर्चितस्ते करोज्ज्वलः शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥२८॥ रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान् सकलानभीष्टान् त्वामा-

१. मैथिलेतरसंस्करणे कोष्ठान्तरगतः पाठः नोपलभ्येते ।

श्रितानां न विपन्नराणां त्वामाश्रिता ह्या-श्रयतां प्रयान्ति ॥ २९ ॥
एतत्कृतं यत्कदनं त्वयाऽद्य धर्मद्विषां देवि महासुराणाम् । रूपैरनेकै-
र्बहुधात्ममूर्त्तिं कृत्वाऽम्बिके तत्प्रकरोति काऽन्या ॥ ३० ॥ विद्यासु
शास्त्रेषु विवेकदीपे--ष्वाद्येषु वाक्येषु च का त्वदन्या । ममत्वगर्तें-
ऽतिमहान्धकारे विभ्रामयत्येतदतीव विश्वम् ॥ ३१ ॥ रक्षांसि
यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र । दावानलो यत्र
तथाऽब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वम् ॥ ३२ ॥ विश्वेश्वरि
त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम् । विश्वेशवन्द्या
भवती भवन्ति विश्वाश्रया ये त्वयि भक्तिनम्राः ॥ ३३ ॥ देवि
प्रसीद परिपालय नोऽरिभीते-र्नित्यं यथा सुरवधादधुनैव सद्यः ।
पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान्
॥ ३४ ॥ प्रणतानां प्रसीद त्वं देवि विश्वार्त्तिहारिणि । त्रैलोक्य-

वासिनामीड्ये लोकानां वरदा भव ॥ ३५ ॥ देव्युवाच ॥ ३६ ॥
वरदाऽहं सुरगणा वरं यन्मनसेच्छथ । तं वृणुध्वं प्रयच्छामि जगता-
मुपकारकम् ॥३७। देवा ऊचुः ॥ ३८ ॥ सर्वबाधाप्रशमनं त्रैलोक्य-
स्याऽखिलेश्वरि । एवमेव त्वया कार्य-मस्मद्वैरिविनाशनम् ॥ ३९ ॥
देव्युवाच ॥ ४० ॥ वैवस्वतेऽन्तरे प्राप्ते अष्टविंशतिमे युगे । शुम्भो
निशुम्भश्चैवान्या-वुत्पत्स्येते महासुरौ ॥ ४१ ॥ नन्दगोपगृहे जाता
यशोदागर्भसम्भवा । ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी
॥४२॥ पुनरप्यतिरौद्रेण रूपेण पृथिवीतले । अवतीर्य्य हनिष्यामि
वैप्रचितांस्तु दानवान् ॥४३॥ भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान्
महासुरान् । रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः ॥ ४४ ॥
ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः । स्तुवन्तो व्याहरिष्यन्ति
सततं रक्तदन्तिकाम् ॥४५॥ भूयश्च शतवार्षिक्या-मनावृष्ट्या-मन-

म्भसि। मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा[1] ॥४६॥ ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीम्। कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः ॥ ४७ ॥ ततोऽहमखिलं लोक-मात्मदेह-समुद्भवैः भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥४८॥ शाक-म्भरीति विख्यातिं तदा यास्याम्यहं भुवि। तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम्॥४९॥ दुर्गा देवीति विख्यातं तन्मे नाम भवि-ष्यति। पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ॥५०॥ रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात्। तदा मां मुनयः सर्वे स्तोष्य-न्त्या-नम्रमूर्तयः ॥ ५१ ॥ भीमा देवीति विख्यातं तन्मे नाम भविष्यति। यदाऽरुणाख्यस्त्रैलोक्ये महाबाधाङ्करिष्यति ॥ ५२ ॥ तदाऽहं भ्रामरं रूपं कृत्वाऽसङ्ख्येय-षट्पदम्। त्रैलोक्यस्य हिता-

१. अयोनिजा=भगवती सीता।

र्थाय वधिष्यामि महासुरम्॥ ५३ ॥ भ्रामरीति च मां लोकाः तदा

र्थाय वधिष्यामि महासुरम् ॥ ५३ ॥ भ्रामरीति च मां लोकाः तदा
स्तोष्यन्ति सर्वतः । इत्थं यदा यदा बाधा दानवोत्था भविष्यति
॥ ५४ ॥ तदा तदाऽवतीर्य्याहं करिष्याम्यरिसंक्षयम् ॥ ५५ ॥

(इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
नारायणीस्तुतिः ॥ ११ ॥)

—०*०—

(अथ द्वादशोऽध्यायः)

देव्युवाच ॥ १ ॥ एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः । तस्याऽहं सकलां बाधां शमयिष्याम्यसंशयम् ॥ २ ॥ मधुकैटभनाशं च महिषासुरघातनम् । कीर्तयिष्यन्ति ये तद्वद् वधं शुम्भनिशुम्भयोः ॥ ३ ॥ अष्टम्याञ्च चतुर्दश्यां नवम्यां चैकचेतसः । श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ॥ ४ ॥ न तेषां दुष्कृतं किञ्चिद् दुष्कृतोत्था न चापदः । भविष्यति न दारिद्र्यं न चैवेष्टवियोजनम् ॥ ५ ॥ शत्रुतो न भयं तस्य दस्युतो वा न राजतः ।
न शस्त्राऽनलतोयौघात् कदाचित् सम्भविष्यति ॥ ६ ॥ तस्मान्म- १००
तन्-माहात्म्यं पठितव्यं समाहितैः । श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् ॥ ७ ॥ उपसर्गानशेषाँस्तु महामारीसमुद्भवान् ।

तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥ ८ ॥ यत्रतत् पठ्यते सम्यङ्-नित्यमायतने मम । सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितम् ॥ ९ ॥ बलिप्रदाने पूजायामग्निकार्ये महोत्सवे । सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च ॥ १० ॥ जानताऽजानता वापि बलिपूजां तथा कृताम् । प्रतीक्षिष्याम्यहं प्रीत्या वह्निहोमं तथा कृतम् ॥ ११ ॥ शरत्काले महापूजा क्रियते या च वार्षिकी । तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥१२॥ सर्वबाधाविनिर्मुक्तो धनधान्यसुतान्वितः । मनुष्यो मत्प्रसादेन भविष्यति न संशयः॥१३॥ श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः । पराक्रमं च युद्धेषु जायते निर्भयः पुमान् ॥ १४ ॥ रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते । नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वताम् ॥ १५ ॥

१. 'सर्वाबाधा' इति पा० । तत्र-आसमन्तात् बाधा = आबाधा, सर्वा चाऽसौ आबाधा, = सर्वाबाधा' इति ज्ञेयम् ।

शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने । ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥ १६ ॥ उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः । दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥ १७ ॥ बालग्रहाभिभूतानां बालानां शान्तिकारकम् । सङ्घातभेदे च नृणां मैत्रीकरणमुत्तमम् ॥ १८ ॥ दुर्वृत्तानामशेषाणां बलहानिकरं परम् । रक्षोभूतपिशाचानां पठनादेव नाशनम् ॥१९॥ सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकम् । पशुपुष्पार्घधूपैश्च गन्धदीपैस्तथोत्तमैः ॥२०॥ विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम् । अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ॥ २१ ॥ प्रीतिर्मे क्रियते साऽस्मिन् सकृत्सुचरिते श्रुते । श्रुतं हरति पापानि तथाऽऽरोग्यं प्रयच्छति ॥ २२ ॥ रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम । युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम् ॥ २३ ॥ तस्मिञ्छ्रुते वैरिकृतं भयं पुंसां न जायते । युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥२४॥ ब्रह्मणा च

कृतास्तास्तु प्रयच्छन्ति शुभां मतिम् । अरण्ये प्रान्तरे वापि दावाग्निपरिवारितः ॥ २५ ॥ दस्युभिर्वा वृतः शून्ये गृहीतोवापि शत्रुभिः । सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः ॥२६॥ राज्ञा क्रुद्धेन चाऽऽज्ञप्तो वध्यो बन्धगतोऽपि वा । आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥ २७ ॥ पतत्सु चापि शस्त्रेषु सङ्ग्रामे भृशदारुणे । सर्वबाधासु घोरासु वेदनाऽभ्यर्दितोपि वा ॥२८॥ स्मरन्ममैतच्चरितं नरो मुच्येत सङ्कटात् । मम प्रभावात् सिंहाद्या दस्यवो वैरिणस्तथा ॥२९॥ दूरादेव पलायन्ते स्मरतश्चरितं मम॥३०॥ ऋषिरुवाच ॥३१॥ इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा ॥३२॥ पश्यतामेव देवानां तत्रैवान्तरधीयत। तेऽपि देवा निरातङ्काः स्वाधिकारान् यथा पुरा ॥ ३३ ॥ यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः । दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि ॥ ३४ ॥ जगद्विध्वंसिनि

तस्मिन् महोग्रेऽतुलविक्रमे । निशुम्भे च महावीर्ये शेषाः पाताल-माययुः ॥ ३५ ॥ एवं भगवती देवी सा नित्याऽपि पुनः पुनः । सम्भूय कुरुते भूप जगतः परिपालनम् ॥ ३६ ॥ तयैतन्मोह्यते विश्वं सैव विश्वम्प्रसूयते । सा याचिता च विज्ञानं तुष्टा ऋद्धिम्प्रयच्छति ॥ ३७ ॥ व्याप्तं तयैतत्सकलं ब्रह्माण्डं मनुजेश्वर । महाकाल्या महाकाले महामारीस्वरूपया ॥ ३८ ॥ सैव काले महामारी सैव सृष्टि-र्भवत्यजा । स्थितिङ्करोति भूतानां सैव काले सनातनी ॥ ३९ ॥ भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे । सैवाभावे तथा लक्ष्मी-र्विनाशायोपजायते ॥ ४० ॥ स्तुता सम्पूजिता पुष्पैर्धूपगन्धादिभिः तथा । ददाति वित्तम्पुत्रांश्च मतिन्धर्मे तथा शुभाम् ॥ ४१ ॥

(इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये देवीवाक्यम् ॥ १२ ॥)

(अथ त्रयोदशोऽध्यायः)

ऋषिरुवाच ॥१॥ एतत्ते कथितं राजन् देवीमाहात्म्यमुत्तमम्। एवंप्रभावा सा देवी ययेदं धार्यते जगत् ॥२॥ विद्या तथैव क्रियते भगवद्विष्णुमायया। तया त्वमेव वैश्यश्च तथैवान्ये विवेकिनः ॥ ३ ॥ मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे। तामुपैहि महाराज शरणं परमेश्वरीम् ॥ ४ ॥ आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥५॥ मार्कण्डेय उवाच ॥ ६ ॥ इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ॥ ७ ॥ प्रणिपत्य महाभागं तमृषिं संशितव्रतम्। निर्विण्णोऽतिममत्वेन राज्याऽपहरणेन च ॥ २८ ॥ जगाम सद्यस्तपसे स च वैश्यो महामुने। सन्दर्शनार्थमम्बाया नदीपुलिनसंस्थितः ॥९॥ स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन्। तौ तस्मिन्पुलिने देव्याः

कृत्वा मूर्त्तिम्महीमयीम् ॥ १० ॥ अर्हणां चक्रतुस्तस्याः पुष्पधूपा-
ग्नितर्पणैः । निराहारौ यताहारौ तन्मनस्कौ समाहितौ ॥ ११ ॥
ददतुस्तौ बलिं चैव निजगात्राऽसृगुक्षितम् । एवं समाराधयतो-स्त्रि-
भिर्वर्षैर्यतात्मनोः ॥१२। परितुष्टा जगद्धात्री प्रत्यक्षम्प्राह चण्डिका
॥ १३ ॥ देव्युवाच ॥ १४ ॥ यत्प्रार्थ्यते त्वया भूप त्वया च कुल-
नन्दन ॥ १५ ॥ मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि ते ॥१६॥
मार्कण्डेय उवाच ॥१७॥ ततो वव्रे नृपो राज्य-मविभ्रंश्यन्यजन्मनि
॥ १८ ॥ अत्रैव च निजं राज्यं हतशत्रुबलम्बलात् । सोऽपि वैश्य-
स्ततो ज्ञानं वव्रे निर्विण्णमानसः ॥ १९ ॥ ममेत्यहमिति प्राज्ञः
सङ्गविच्युतिकारकम् ॥ २० ॥ देव्युवाच ॥ २१ ॥ स्वल्पैरहोभि-
र्नृपते स्वं राज्यं प्राप्स्यते भवान् । हत्वा रिपूनस्खलितं तव तत्र
भविष्यति ॥२२॥ मृतश्च भूयः सम्प्राप्य जन्म देवाद्विवस्वतः ॥२३॥

सावर्णिको मनुर्नाम भवान् भुवि भविष्यति । वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभिवाञ्छितः ॥२४॥ तम्प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति ॥ २५ ॥ मार्कण्डेय उवाच ॥ २६ ॥ इति दत्त्वा तयोर्देवी यथाऽभिलषितं वरम् ॥ २७ ॥ बभूवाऽन्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता । एवन्देव्या वरँल्लब्ध्वा सुरथः क्षत्रियर्षभः ॥२८॥ सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥ २९ ॥ सावर्णिर्भविता मनुः[1]

(इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे
देवीमाहात्म्ये सम्पूर्णम् ॥ १३ ॥)

—○*○—

१. रुद्रयामले— स्तोत्रे च संहितायां च अनयश्लोकं पठेद् द्विधा ।

अथ देवीसूक्तम्[1]

अहं रुद्रेभिरित्यस्य वागाम्भृणी ऋषिस्त्रिष्टुप्छन्दो वागाम्भृणी देवता देवीसूक्तजपे विनियोगः ॥ ॐ३म् ॥ अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः । अहं मित्रावरुणो भा बिभर्म्यहमिन्द्राग्नी अहमश्विनो भा ॥१॥ अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् । अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते ॥२॥ अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् । तां मा देवा व्यदधुः पुरुत्राभूरिस्थात्रां भूर्या वेशयन्तीम् ॥ ३ ॥ मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम् । अमन्त वो मान्त उपक्षियन्ति श्रुधि-श्रुत-श्रद्धिवं ते

१. दुर्गासप्तशतीपाठान्ते इदं सूक्तमवश्यं पठनीयमिति मैथिलानांश राद्धन्तः ।

वदामि ॥४॥ अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः । यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥५॥ अहं रुद्राय धनुरातनोमि ब्रह्माद्विषे शरवे हन्तवाऽउ । अहं जनाय समदं कृणोम्यहं द्यावा पृथिवी आ विवेश ॥ ६ ॥ अहं सुवे पितरमस्य मूर्द्धन्मम योनि रप्स्वन्तः समुद्रे । ततो वितिष्ठे भुवनानि विश्वोतामूं द्यां वर्ष्मणोपस्पृशामि ॥ ७ ॥ अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा-परो दिवापर एना पृथिव्यैतावती महिना सम्बभूव ॥ ८ ॥

इति ऋग्वेदोक्तं देवीसूक्त सम्पूर्णम् ।

—○*○—

इन्दुमती-परिशिष्टम्

अथ सिद्धकुञ्जिकास्तोत्रम्

शिव उवाच—

शृणु देवि प्रवक्ष्यामि कुञ्जिकास्तोत्रमुत्तमम् । येन मन्त्रप्रभावेण चण्डीजापः शुभो भवेत् ॥ १ ॥ न कवचं नार्गलास्तोत्रं कीलकं न रहस्यकम् । न सूक्तं नापि ध्यानं न च न्यासो न च वार्चनम् ॥२॥ कुञ्जिकापाठमात्रेण दुर्गापाठफलं लभेत् । अस्ति गुह्यतरं देवि देवानामपि दुर्लभम् ॥ ३ ॥ गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वती । मारणं मोहनं वश्यं स्तम्भनोच्चाटनादिकम् । पाठमात्रेण संसिद्ध्येत् कुञ्जिकास्तोत्रमुत्तमम् ॥ ४ ॥

अथ मन्त्रः—

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ॥ ॐ ग्लौं हुं क्लीं जूं सः ज्वालय ज्वालय ज्वल ज्वल जूं प्रज्वल प्रज्वल ऐं ह्रीं क्लीं चामुण्डाय विच्चे ज्वल हं सं लं क्षं फट् स्वाहा ।

नमस्ते रुद्ररूपिण्यै नमस्ते मधुमर्दिनि । नमः कैटभहारिण्यै नमस्ते महिषार्दिनि

नमस्ते रुद्ररूपिण्यै नमस्ते मधुमर्दिनि । नमः कैटभहारिण्यै नमस्ते महिषार्दिनि ।। १ ।। नमस्ते शुम्भहन्त्र्यै च निशुम्भासुरघातिनि ।। २ ।। जाग्रतं हि महादेवि जपं सिद्धं कुरुष्व मे । ऐंकारी सृष्टिरूपायै ह्रींकारी प्रतिपालिका ।। ३ ।। क्लींकारी कामरूपिण्यै बीजरूपे नमोऽस्तु ते । चामुण्डा चण्डघाती च यैकारी वरदायिनी ।।४।। विच्चे चाऽभयदा नित्यं नमस्ते मन्त्ररूपिणी ।। ५ ।। धां धीं धूं धूर्जटेः पत्नी वां वीं वूं वागधीश्वरी । क्रां क्रीं क्रूं कालिका देवि शां शीं शूं मे शुभं कुरु ।। ६ । हुं हुं हुंकाररूपिण्यै जं जं जं जम्भनादिनी । भ्रां भ्रीं भ्रूं भैरवी भद्रे भवान्यै ते नमो नमः ।। ७ ।। अं कं चं टं तं पं यं सं वीं दुं ऐं वीं हं क्षं धिजाग्रं धिजाग्रं त्रोटय त्रोटय दीप्तं कुरु कुरु स्वाहा । पां पीं पूं पार्वती पूर्णा खां खीं खूं खेचरी तथा ।। ८ ।। सां सीं सूं सप्तशती देव्या मन्त्रसिद्धिं कुरुष्वा मे इदं तु कुञ्जिकास्तोत्रं मन्त्रजागर्तिहेतवे ।। अभक्ते नैव दातव्यं गोपितं रक्ष पार्वति । यस्तु कुञ्जिकया देवि हीनां सप्तशतीं पठेत् ।। न तस्य जायते सिद्धिररण्ये रोदनं यथा ।।

इति श्रीरुद्रयामले गौरीतन्त्रे शिवपार्वतीसंवादे सिद्धकुञ्जिकास्तोत्रं सम्पूर्णम् ।

*

अथ दुर्गादलम्

अथ चण्डिकादलप्रारम्भः । ॐ नमश्चण्डिकायै । अथातः संप्रवक्ष्यामि चण्डिकादलमुत्तमम् । मन्त्रं विना तु जप्त्वा वै तत्सर्वं निष्फलं भवेत् ॥ १ ॥ ॐ नमो भगवती जय जय चामुण्डे चण्डेश्वरी चण्डायुधे चण्डरूपधारिणी तांडवप्रिये कुण्डलीभूत-दिक्नागमंडलीभूत-गंडस्थिते समस्तजगद्दण्डसंहारकारिणि परे अनन्तानन्तरूपे शिवे नरशिरोमालालंकृतवक्षःस्थले महाकपालमालोज्ज्वलन्मणिमुकुटचूडावतंसचन्द्रखण्डे महाभीषणे देवि महामाये षोडशकलापरिवृतोल्लसिते महादेवासुरसमरनिधूतरुधिराद्रिकृंतलिम्पिततनु कमलोद्भासितकरे सम्पूर्णरुधिरशोभितमहाकपोले सूर्यभासिनि दृढतरा बद्धमनु ॥११४॥ धरशोभितमहाकपोले चन्द्रभासिनि दृढतराबद्धमहानादिसहितहेमकाञ्चिदामोज्वलीकृतमहामण्डिते महाशम्भुरूपे महाव्याघ्रचर्माम्बरधरे महासर्पयज्ञोपवीतिनी महाश्मशानभस्मोद्धूलितसर्वगात्रे काली कंकाली महाकाली कालाग्नि रुद्रकाली कालसंकर्षिणी ॥ ३०० ॥ कालरात्रि नमो भक्षिणी नामाभूतप्रेतपिशाचगणसहस्रसञ्चारिणी नानाव्याधिप्रशमनी सर्वदुष्टप्रमथिनी सर्वदारिद्र्य-

नाशिनी युगे युगे खादितमांसखण्डे गायत्री विदितसकला कलायमानकंकालधारिणी मधुरमांसरुधिरसन्ततविलासिनी सकलसुरासुरगन्धर्वविद्याधरकिन्नरकिम्पुरुषादिभि- स्तूयमाने सर्वमन्त्राधिभूताधिकारिणी सर्वशक्तिप्रधाने सकललोकपावनी सकलदुरित- प्रक्षालिनी सकललोकजननी ब्राह्मी माहेश्वरी वैष्णवी वाराही नारसिंहीन्द्राणी चामुण्डे । महालक्ष्मीस्वरूपे महाविद्ये योगिनी ॥ ५०० ॥ योगीश्वरी चण्डिके महामाये विश्वरूपिणी सर्वाभरणभूषिते अतल-वितल-सुतल-महातल-रसातल-पाताला- दिचतुर्दशभुवनैकनाथे, ॐ नमः पितामहाय ॐ नमो नारायणाय ॐ नमः शिवाय इति सकललोकैकजात्यमाने ब्रह्मविष्णुमहेश्वरे दण्डकमण्डलुधारिणी शङ्खचक्रगदाधारिणी परशुशूलपिनाककण्टकधारिणी सरस्वती पद्मालये सावित्री सकलजगत्स्वरूपिणी महाक्रूरे प्रसन्नरूपधारिणी सर्वमङ्गलप्रिये महिषासुरमर्दिनी कात्यायनी दुर्गा निद्रारू- पिणी शरचापशूलकपालकरवालखड्गडमरुकाङ्कुशगदापरशुतोमरभिन्दिपालभुशुण्डी मुसलमुद्गरपरिघायुधदोर्दंडी सहस्रचन्द्रार्कवह्निनयनेन्द्राग्नियमनिर्ऋतिवरुणवायुकुवे- रईशानप्रधानशक्तिभूते सप्तद्वीपसमुद्रोपर्युपरि महाभ्यासेश्वरी महासचराचरप्रपञ्चतनूदरे महाप्रधाने महाकैलासपर्वतोद्याने वनक्षेत्रनदीतीरदेवताद्यायतनालंकृते मेदिनीनाथे वसिष्ठवामदेवादिमुनिगणस्पृष्टचरणारविन्दे द्विचत्वारिंशद्वर्णमहते पर्यास्थाने वेद-

वेदाङ्गानेकशास्त्रभूते शब्दब्रह्ममये मातृकादेवी शिरस्सन् रक्ष रक्ष मम शत्रून्हुङ्कारेण नाशय नाशय भूतप्रेतपिशाचानुच्चाटयोच्चाटय वशी कुरु वशी कुरु क्षोभय क्षोभय संक्रामय विदारय विदारय दावय दावय सकलचोरान्मूर्ध्नि स्फोटय स्फोटय सकलशत्रून् शीघ्रं मारय मारय हुं फट् स्वाहा ॥ १००० ॥

इति रुद्रयामले तन्त्रे सप्तशतीदलं सम्पूर्णम् ।

अथ दुर्गासप्तशत्यंगहृदयम्

अस्य श्रीचण्डिकाहृदयमालामन्त्रस्य त्रिगुणात्मऋषिः विराट् छन्दः श्रीमहाचण्डी देवता ऐं बीजम् ह्रीं शक्तिः क्लीं कीलकम् जपेविनियोगः । हृदयादिषडङ्गः— ब्रह्मोवाच । अथातः संप्रवक्ष्यामि विस्तरेण यथातथम् । चण्डिकाहृदयं गुह्यं शृणुष्वैकाग्रमानसः । ॐ ह्रां ह्रीं हुं ऐं श्रीं श्रीं श्रों नमो भगवति जय जय ज्वालामालिनी चामुण्डे चण्डिके त्रिदशमणिमुकुटकोटिसङ्घट्टितचरणारविन्दे गायत्रीसावित्रीसरस्वती-महावाणकृताभरणे भैरवरूपधारिणी प्रकटसुदंष्ट्रोग्रवदने घोरघोरासने नयनोज्ज्वल-ज्वालासहस्रपरिवृते महाट्टहासधवलीकृतदिगन्तरे दिवाकरसहस्रपरिवृते कामरूपधारिणी महामणिद्योतितशशिप्रभासितसकलदिगन्तरे सर्वायुधपरिपूर्णे कपालहस्ते गजामिन्योत्तरिण्ये भूतवेतालपरिवृते प्रकम्पितचराचरे मधुकैटभ-महिषासुर-धूम्र-

लोचन-चण्डमुण्ड-रक्तबीज-निशुम्भशुम्भादिदैत्यनिष्कंटकी कालरात्रि महामये शिवे नित्ये त्रिभुवनधराधरे वामे ज्येष्ठे रौद्रि अम्बिके काली कलविकारिणी बलप्रमथिनी सर्वभूतदमिनी मनोन्मर्या ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही नारसिंहीन्द्राणी चामुंडे माहेन्द्री शिवदूती महाकालीमहालक्ष्मीमहासरस्वतीत्रिस्थिते नादवन्ध्यास्थिते महोग्रविषोरगफणाफणिमुकुटरत्नज्वालावले महाहारभूषितपादबाहुकर्णोत्तमाङ्गे माला-कुले नवरत्ननिधिकोशे शब्द-स्पर्श-रूप-रस-गन्धाकाश-वाक्यानि पादपायूपस्थश्रोत्रत्व-क्चक्षुर्जिह्वाघ्राणमध्यस्थिते चक्षुष्मती महाविषोपविघ्ने महाज्वालानले महाभैरवस्तुते सर्वसिद्धिप्रदे निर्मले निष्कले नाभ्याधरादिसंस्थिते परं ज्योतिःस्वरूपे सोमसूर्याग्नि-मण्डलपरिवृते ऊर्ध्वविशुद्धांतकप्रभे विनिकृतब्रह्मविष्णुरुद्रविनिर्गते परे अपरे प्रभा-भासितचराचरे पञ्चविंशतितत्त्वावबोधिनी महाशून्यागमे पतिबन्धुसंस्थिते अधोर्ध्व-संस्थिते भुक्तिमुक्तिफलप्रदे निर्गुणे ऋग्यजुःसामाथर्वणपठिते एह्येहि भगवति स्थूल-सूक्ष्मपरहुंकारनिरूपिते परमकारुणिके महाज्वालामणि महिषोपरि गन्धर्वविद्याधराश्रिते भुजङ्गमहिमे जम्भिणी मोहिनी क्षोभिणी वशीकरणी जम्भे मोहे क्षोभे वशीकरणे बीजपञ्चकमध्यस्थिते महायोगिनी महाज्वरक्षेत्रनायिके यक्षराक्षसमहाज्वरमहाविषो-पविघ्ने गन्धर्वविद्याधराराधिते ओङ्कारश्रीङ्कारहस्ते, ॐ क्रों अग्निपात्रे द्रां शोषय शोषय

प्लूं प्लावय प्लावय क्लीं व्रीं सुकुमारय सुकुमारय प्लुं सतैशय सतैशय सौं उन्मादय उन्मादय ग्लौं मोहय हीं श्रां हीं श्रावेशय आवेशय श्रीं प्रवेशय प्रवेशय स्त्रीं कर्षय हुं हुं हुं फट् अतीतानागतवर्तमानन्दिशं विदिशं ऐं हीं श्रीं श्रावय श्रावय सर्वं प्रवेशय प्रवेशय त्रैलोक्यवशवर्ति ऐङ्कारचित्तं वशी कुरुष्व एं हीं श्रीं स्त्रीं द्रावय द्रावय सर्वं प्रवेशय प्रवेशय ऐङ्कारचित्तं वशङ्कुरु वशंकुरु ऐं हीं श्रीं हीं हीं हुं हैं हौं हः, ऐं हीं श्रीं स्त्रां स्त्रीं स्त्रूं स्त्रैं स्त्रौं स्त्रः मम सर्वकार्याणि साधय साधय हुंफट् स्वाहा ॥१०९०१८॥ एकविंशतिवारन्तु पठेद्वज्जपेत्तु यः । राजद्वारे श्मशाने च विदेशे शत्रुमण्डले ॥१॥ भूताग्निरणमध्ये च सर्वकार्याणि साधयेत् । चण्डिकाहृदयङ्गुह्यं त्रिसन्ध्यं कीर्तयेद् द्विजः ॥ २ ॥ सर्वकामप्रदं नृणां भुक्तिं मुक्तिञ्च विन्दति ॥ ३ ॥

इति रुद्रयामले दुर्गासप्तशतीहृदयं सम्पूर्णम् ।

○ * ○

अथ कात्यायनीतन्त्रोक्तानि प्रयोगान्तराणि

प्रतिश्लोकामाद्यन्तयोः प्रणवं जपेन्मन्त्रसिद्धिः ॥ १ ॥

अग्रे सर्वत्र श्लोकपदं मन्त्रोपलक्षणम् । सप्रणवमनुलोमव्याहृतित्रयमादौ अन्ते तु विलोमं तदित्येवं प्रतिश्लोकं कृत्वा शतावृत्तिपाठेऽतिशीघ्रसिद्धिः ॥ २ ॥

प्रतिश्लोकमादौ जातवेदस इत्यृचं पठेत् सर्वकामसिद्धिः ॥ ३ ॥ अपमृत्युवारणाय

प्रतिश्लोकमादौ जातवेदस इत्यृचं पठेत् सर्वकामसिद्धिः ॥ ३ ॥ अपमृत्युवारणाय त्र्यम्बकमन्त्रं पठेत् ॥ आदावन्ते च शतमित्यर्थः ॥ प्रतिश्लोकं तन्मन्त्रजप इत्यन्यत्र ॥ ४ ॥ प्रतिश्लोकं शूलेन पाहि नो देवीति पाठादपमृत्युनाशः । अस्य केवलस्यापि श्लोकस्य लक्षमयुतं सहस्रं शतं वा जपे अपमृत्युवारणम् ॥५॥ प्रतिश्लोकं शरणागतदीनार्तेति श्लोकं पठेत् सर्वकार्यसिद्धिः ॥६॥ प्रतिश्लोकं करोतु सा नः शुभेत्यर्धं पठेत् सर्वकार्यसिद्धिः ॥ ७ ॥ स्वाभीष्टवरप्राप्तये एवं देव्या वरं लब्ध्वेति श्लोकं पठेत् ॥ ८ ॥ सर्वापत्तिवारणाय प्रतिश्लोकं दुर्गे स्मृतेति पठेत् । अस्य केवलस्यापि श्लोकस्य कार्यानुसारेण लक्षमयुतं सहस्रं शतं वा जपः । ९ ॥ सर्वबाधेत्यस्य लक्षजपे प्रतिश्लोकं पाठे वा श्लोकोक्तं फलम् ॥१०॥ इत्थं यदा यदा बाधेति श्लोकजपे महामारीशान्तिः ॥११॥ ततो वव्रे नृपो राज्यमिति मन्त्रस्य जपे पुनः स्वराज्यलाभः ॥ १२ ॥ हिनस्ति दैत्यतेजांसि इत्यनेन सदीपबलिदाने घण्टाबन्धने च बालग्रहशान्तिः ॥ १३ ॥ आद्याऽऽवृत्तिमनुलोमेन पठित्वा ततो विपरीतक्रमेण द्वितीयामनुलोमेन तृतीयामित्येवमावृत्तित्रयेण शीघ्रं कार्यसिद्धिः ॥१४॥ सर्वापत्तिवारणाय दुर्गे स्मृतेत्यर्धं ततो यदन्ति यच्च दूरके इत्यृचं तदन्ते दारिद्र्यदुःखेत्यर्द्धम् । एवं कार्यानुसारेण लक्षमयुतं सहस्रं शतं वा जपः ॥ १५ ॥ कां सोस्मीत्यृचं प्रतिश्लोकं पठेत्, लक्ष्मीप्राप्तिः ॥ १६ ॥ प्रतिश्लोकम् अनृणा अस्मिन्नित्यृचं पठेत्

ऋणपरिहारः ॥ १७ ॥ मारणार्थमेवमुक्त्वा समुत्पत्येति श्लोकं प्रतिश्लोकं पठेत्, मारणोक्तावृत्तिभिः फलसिद्धिः ॥ १८ ॥ ज्ञानिनामपि चेतांसि इति श्लोकजपमात्रेण सद्यो मोहनमित्यनुभवसिद्धम् । प्रतिश्लोकं तच्छ्लोकपाठे त्ववश्यम् ॥१९॥ रोगानशेषानिति श्लोकस्य प्रतिश्लोकं पाठे सकलरोगनाशः । तन्मात्रजपेऽपि सः ॥२०॥ इत्युक्ता सा तदा देवी गम्भीरेति श्लोकस्य प्रतिश्लोकं पाठे पृथग्जपे वा विद्याप्राप्तिः वाग्वैकृतिनाशश्च ॥ २१ ॥ भगवत्या कृतं सर्वमित्यादि द्वादशोत्तरशताक्षरो मन्त्रः सर्वकामदः सर्वापत्तिवारणश्च ॥२२॥ देवि प्रपन्नार्तिहरे इति श्लोकस्य यथाकार्यं लक्षायुतसहस्रशतान्यतमसंख्यजपे प्रतिश्लोकं पाठे वा सर्वापन्निवृत्तिः सर्वकामावाप्तिश्च । एषु प्रयोगेषु प्रतिश्लोकं दीपाग्रे केवलमेव नकस्कारकरणेऽतिशीघ्रं सिद्धिः । प्रतिश्लोकं कामबीजसम्पुटितस्य एकचत्वारिंशद्दिनं त्रिरावृत्तौ सर्वकामसिद्धिः ॥२३॥ एकविंशतिदिनपर्यन्तमुक्तरीत्या प्रत्यहं द्वादशावृत्तौ वशीकरणम् ॥ २४ ॥ मायाबीजसम्पुटितस्य षट्पल्लवसहितस्य सप्तदिनपर्यन्तं त्रयोदशावृत्तावुच्चाटनसिद्धिः ॥ २५ ॥ तादृश्यामेव दिनचतुष्टयमेकादशावृत्तौ सर्वोपद्रवनाशः ॥ २६ ॥ एकोनपञ्चाशद्दिनपर्यन्तं प्रतिश्लोकं श्रीबीजसम्पुटितस्य पञ्चदशावृत्तौ लक्ष्मीप्राप्तिः ॥ २७ ॥ प्रतिश्लोकं वाग्बीजसम्पुटितस्य शतावृत्त्या विद्याप्राप्तिः ॥ २८ ॥ इति प्रयोगान्तराणि ।

अथ शतचण्डीविधिः

शङ्करस्य भवान्या वा प्रासादनिकटे शुभम् । मण्डपं द्वारवेद्याढ्यं कुर्यात् सध्वजतोरणम् ॥ १ ॥ तत्र कुण्डं प्रकुर्वीत प्रतीच्या मध्यतोऽपि वा । स्नात्वा नित्यक्रियां कृत्वा वृणुयाद्दश वडवान्[1] ॥ २ ॥ जितेन्द्रियान् सदाचारान् कुलीनान् सत्यवादिनः । व्युत्पन्नां चण्डिकापाठरतान् लज्जादयावतः ॥ ३ ॥ मधुपर्कविधानेन स्वर्णवस्त्रादिदानतः । जपार्थमासनं मालां दद्यात्तेभ्योऽपि भोजनम् ॥ ४ ॥ ते हविष्यान्नमश्नन्तो मंत्रार्थगतमानसाः । भूमौ शयानाः प्रत्येकं जपेयुश्चण्डिकास्तवम् ॥ ५ ॥ मार्कण्डेयपुराणोक्तं दशकृत्वः सचेतसः । नवार्णं चण्डिकामन्त्रं जपेयुश्चायुतं पृथक् ॥ ६ ॥ पृथक् सम्पुटीकरणादिति शेषः । प्रत्येकं ब्राह्मणैरयुतजपः कार्यः ॥ अष्टमी-नवमी-चतुर्दशी-पौर्णमासीषु यथा शतावृत्तिसमाप्तिर्भवति तथारम्भः कर्त्तव्य इति साम्प्रदायिकाः ॥ यजमानः पूजयेच्च कन्यानां नवकं शुभम् ॥ द्विवर्षाद्या दशाब्दान्ताः कुमारी परिपूजयेत् ॥ ७ ॥

इति शतचण्डीविधिः

—◌*◌—

१.—वाडवाः=ब्राह्मणाः ।

अथ सप्तश्लोकी दुर्गा

शिव उवाच—देवि त्वं भक्तसुलभे सर्वकार्यविधायिनि । कलौ हि कार्यसिद्ध्यर्थमुपायं ब्रूहि यत्नतः ॥ देव्युवाच—शृणु देव प्रवक्ष्यामि कलौ सर्वेष्टसाधनम् । मया तवैव स्नेहेनाप्यम्बास्तुतिः प्रकाश्यते ॥

ॐ अस्य श्रीदुर्गासप्तश्लोकीस्तोत्रमन्त्रस्य नारायणऋषिः अनुष्टुप् छन्द श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः श्रीदुर्गाप्रीत्यर्थं सप्तश्लोकीदुर्गापाठे विनियोगः।

ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा। बलादाकृष्य मोहाय महामाया प्रयच्छति ॥१॥ दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि । दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ॥२॥ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ ३ ॥ शरणागतदीनार्तपरित्राणपरायणे। सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥ ४ ॥ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते । भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥ ५ ॥ रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान् सकलनाभीष्टान् ।

त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥ ६ ॥ सर्वबाधाप्रश-

त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥ ६ ॥ सर्वबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि । एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥ ७ ॥

इति सप्तश्लोकीदुर्गा

—○✻○—

अथ पूर्वप्रतिष्ठापित-सर्वदेवी-षोडशोपचारपूजनविधिः

तत्र संकल्पः—ओमद्येत्यादिममेह जन्मनि सर्वापच्छान्तिपूर्वक-दीर्घायुविपुलपुत्रपौत्राद्यवच्छिन्नसन्ततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयप्रमुखचतुर्विधपुरुषार्थसिद्ध्यर्थं श्रीअमुकदेव्याः पूजनमहं करिष्ये । स्वागतम्-स्वागतं ते महामाये प्रसीद सर्वमंगले । पूजां गृहाण विविधां सर्वकल्याणकारिणि ॥ आवाहनम्—आगच्छ वरदे देवि सर्वदानवभञ्जिनि । पूजां गृहाण सुमुखि नमस्ते वरदे शुभे ॥ आसनम्—अनेकरत्नसंयुक्तं नानामणिगणान्वितम् । कार्तस्वरमयं दिव्यमासनं प्रतिगृह्यताम् ॥ पाद्यम्—गङ्गादि सर्वतीर्थेभ्यो मया प्रार्थनया हृतम् । तोयमेतत् सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम् ॥ अर्घ्यम्-गन्धपुष्पाक्षतैर्युक्तमर्घ्यं सम्पादितं मया । गृहाण त्वं महादेवि प्रसन्ना भव सर्वदा ॥ आचमनम्—आचम्यतां त्वया देवि भक्तिं मे ह्यचलां कुरु । ईप्सितं मे वरं

१. इदमासनं श्री अमुकदेव्यै नमः । इति सर्वत्रोहः कर्तव्यः ।

देहि परत्र च परां गतिम् ॥ स्नानम्–जाह्नवीतोयमानीतं शुभं कर्पूरसंयुतम् । स्नापयामि सुरश्रेष्ठे त्वां पुत्रादिफलप्रदाम् ॥ पञ्चामृतं–पयो दधि घृतं क्षौद्रं शितया च समन्वितम् । पञ्चामृतमनेनाद्य कुरु स्नानं महेश्वरि ॥ शुद्धोदक०—परमानन्दबोधाब्धिनिमग्ननिजमूर्तये । सांगोपांगमिदं स्नानं कल्पयामि सुरेश्वरि ॥ वस्त्रम्—वस्त्रञ्च–सोमदैवत्यं लज्जायास्तु निवारणम् । मया निवेदितं भक्त्या गृहाण परमेश्वरि ॥ उपवस्त्रम्–यामाश्रित्य महामाया जगत्संमोहिनी सदा । तस्यै ते परमेशायै कल्पयाम्युत्तरीयकम् ॥ मधुपर्कः–दधिमध्वाज्यसंयुक्तं पात्रयुग्मसमन्वितम् । मधुपर्कं गृहाण त्वं वरदा भव शोभने ॥ गन्धम्–परमानन्दसौभाग्य-परिपूर्णदिगन्तरे । गृहाण परमं गन्धं कृपया परमेश्वरि ॥ कुंकुमम्–कुंकुमं कान्तिदं दिव्यं कामिनीकामसम्भवम् । कुंकुमेनार्चिते देवि प्रसीद परमेश्वरि ॥ आभूषणम्–हारकङ्कणकेयूरमेखलाकुण्डलादिकम् । रत्नाढ्यं कुण्डलोपेतं भूषणं प्रतिगृह्यताम् ॥ सिन्दूरम्–सिन्दूरमरुणाभासं जपाकुसुमसन्निभम् । पूजितासि मया देवि प्रसीद परमेश्वरि ॥ कज्जलः–चक्षुर्भ्यां कज्जलं रम्यं सुभगे शान्तिकारिके । कर्पूरज्योतिरुत्पन्नं गृहाण परमेश्वरि ॥ सौभाग्यम्०–सौभाग्यसूत्रं वरदे सुवर्णमणिसंयुते । कण्ठे बध्नामि देवेशि सौभाग्यं देहि मे सदा ॥ सुगन्धितैलम्–चन्दनागरुकर्पूरकुंकुमं रोचनं तथा । कस्तूर्यादिसुगन्धांश्च सर्वाङ्गेषु विले-

पनम् ॥ अक्षताः–रञ्जिताः कुंकुमौघेन अक्षताश्चातिशोभनाः । ममैषां देवि दानेन

पनम् ॥ अक्षताः—रञ्जिताः कुंकुमौघेन अक्षताश्चातिशोभनाः । ममैषां देवि दानेन प्रसन्ना भव शोभने ॥ पुष्पम्—चलत्परिमलामोदमत्तालिगणसङ्कुलम् । आनन्दनन्दनोद्भूतं भद्रायै कुसुमं नमः ॥ पुष्पमाला—सुरभिपुष्पनिचयैः ग्रथितां शुभमालिकाम् । ददामि तव शोभार्थं गृहाण परमेश्वरि ॥ बिल्वपत्रम्—अमृतोद्भवः श्रीवृक्षो महादेवीप्रियः सदा । बिल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि ॥ धूपः—दशांगं गुग्गुलं धूपं चन्दनागरुसंयुतम् । समर्पितं मया भक्त्या महादेवि प्रगृह्यताम् ॥ दीपः—घृतवर्तिसमायुक्तं महातेजो महोज्ज्वलम् । दीपं दास्यामि देवेशि सुप्रीता भव सर्वदा ॥ नैवेद्यम्—अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् । नैवेद्यं गृह्यतां देवि भक्तिं मे ह्यचलां कुरु ॥ फलादीनि—फलमूलानि सर्वाणि ग्राम्यारण्यानि यानि च । नानाविधसुगन्धीनि गृह्ण देवि ममाचिरम् ॥ आचमनम्—महादेवि नमस्तुभ्यं कुर्वाचमनमम्बिके निरन्तरमहं वन्दे चरणौ तव मङ्गले । ताम्बूलम्—एलालवङ्गकस्तूरीकर्पूरैः पुष्पवासिताम् । वीटिकां मुखवासार्थमर्पयामि सुरेश्वरि ॥ दक्षिणा—पूजाफलसमृद्ध्यर्थं तवाग्रे स्वर्णमीश्वरि । स्थापितं तेन मे प्रीत्या पूर्णान् कुरु मनोरथान् ॥ प्रार्थना—सर्वस्वरूपे सर्वेशे सर्वशक्तिस्वरूपिणि । पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ॥ आरार्तिकम्—नीराजनं सुमांगल्यं कर्पूरेण समन्वितम् । चन्द्रार्कवह्निसदृशं महादेवि नमोऽस्तु ते ॥

पुष्पाञ्जलिः—चण्डिके त्वं महामाये सर्वशक्तिस्वरूपिणि । त्वं काली कमला ब्राह्मी त्वं जया विजया शिवा ॥ त्वं लक्ष्मीर्विष्णुलोकेषु कैलासे पार्वती तथा । सरस्वती ब्रह्मलोके चेन्द्राणी शक्रपूजिता ॥ वाराही नारसिंही च कौमारी वैष्णवी तथा । त्वमापः सर्वलोकेषु ज्योतिस्त्वं ज्योतिरूपिणी ॥ योगमाया त्वमेवाऽसि वायुरूपा नभस्थिता । सर्वगन्धवहा पृथ्वी नानारूपा सनातनी ॥ विश्वरूपे च विश्वेशि विश्वशक्तिसन्विते । प्रसीद परमानन्दे महादेवि नमोऽस्तु ते ॥ नानापुष्पसमाकीर्णं नानासौरभसंयुतम् । पुष्पाञ्जलिं च विश्वेशि गृहाण भक्तवत्सले ॥ प्रदक्षिणा—नमस्ते देवि देवेशि नमस्ते ईप्सितप्रदे । नमस्ते जगतां धात्रि नमस्ते भक्तवत्सले ॥ दण्डवत् प्रणामः—नमः सर्वहितार्थायै जगदाधारहेतवे । साष्टांगोऽयं प्रणामस्तु प्रयत्नेन मया कृतः ॥ प्रार्थना—धर्मान् देहि धनं देहि सौभाग्यं देहि मंगले । अन्यांश्च सर्वकामांश्च देहि देवि नमोऽस्तु ते ॥

क्षमा-याचना

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया । दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥ १ ॥ आवाहनं न जानामि न जानामि विसर्जनम् । पूजां चैव न जानामि क्षम्यतां परमेश्वरि ॥ २ ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि । यत्पूजितं मया

देवि परिपूर्णं तदस्तु मे ॥ ३ ॥ अपराधशतं कृत्वा जगदम्बेति चोच्चरेत् यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥४॥ सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदम्बिके। इदानीमनुकम्प्योऽहं यथेच्छसि तथा कुरु ॥ ५ ॥ अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् । तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥ ६ ॥ कामेश्वरि जगन्मातः सच्चिदानन्दविग्रहे । गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥७॥ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥ ८ ॥

इति सर्वदेवीषोडशोपचारपूजनविधिः ।

—○*○—

अथ देव्यपराधक्षमापनस्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो, न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः । न जाने मुद्रास्ते तदपि च न जाने विलपनं, परं जाने मातः त्वदनुसरणं क्लेशहरणम् ॥ १ ॥ विधेरज्ञानेन द्रविणविरहेणालसतया, विधेयाऽशक्यत्वात् तव चरणयोर्या च्युतिरभूत् । तदेतत् क्षन्तव्यं जननि सकलोद्धारिणि शिवे, कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ २ ॥ पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः, परं तेषां मध्ये विरलतरलोऽहं तव सुतः । मदीयोऽयं त्यागः समुचि-

तमिदं नो तव शिवे, कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥३॥ जगन्मातर्मातः तव चरणसेवा न रचिता, न वा दत्तं देवि द्रविणमपि भूयस्तव मया। तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे, कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ४ ॥ परित्यक्ता देवा विविध-विधसेवा-कुलतया, मया पञ्चाशीतेरधिकमपनीते तु वयसि। इदानीं चेन्मातः तव यदि कृपा नापि भविता, निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥ ५ ॥ श्वपाको जल्पाको भवति मधुपाकोपमगिरा, निरातङ्को रङ्को विहरति चिरं कोटिकनकैः। तवापर्णे कर्णे विशति मनुवर्णे फलमिदं, जनः को जानीते जननि जपनीयं जपविधौ ॥ ६ ॥ चिताभस्मालेपो गरलमशनं दिक्पटधरो, जटाधारी कण्ठे भुजगपतिहारी पशुपतिः। कपाली भूतेशो भजति जगदीशैकपदवीं, भवानि त्वत्पाणि-ग्रहण-परिपाटी-फलमिदम् ॥ ७ ॥ न मोक्षस्याकाङ्क्षा नच विभववाञ्छापि च न मे, न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः। अतस्त्वां संयाचे जननि जननं यातु मम वै, मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥ ८ ॥ नाराधितासि विधिना विविधोपचारैः, किं रूक्षचिन्तनपरैर्न कृतं वचोभिः। श्यामे त्वमेव यदि किञ्चन मय्यनाथे, धत्से कृपामुचितमम्ब परं तवैव ॥ ९ ॥ आपत्सु मग्नः स्मरणं त्वदीयं, करोमि दुर्गे करुणार्णवेशि। नैतच्छठत्वं मम भावयेथाः क्षुधातृषार्ता जननीं स्मरन्ति

॥१०॥ जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि । अपराधपरम्परावृतं न हि माता समुपेक्षते सुतम् ॥ ११ ॥ मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि । एवं ज्ञात्वा महादेवि यथायोग्यं तथा कुरु ॥ १२ ॥

इति (आद्यशंकराचार्यपीठस्थ) श्रीशंकराचार्यविरचितं देव्यपराधक्षमापनस्तोत्रं सम्पूर्णम् ।

*

अथ छागबलिदानविधिः

(बलिदान-समीक्षा पुस्तकादौ द्रष्टव्या)

तत्र प्रथमं पञ्चदेवतां विष्णुं च सम्पूज्य प्रधानदेवपूजां विधाय-स्वयमुदङ्मुखः श्छागं पूर्वमुखं सिन्दूरादिनालंकृत्य पाद्यादिभिः सम्पूज्य मन्त्रं पठेत्—ॐ छाग त्वं बलिरूपेण मम भाग्यादुपस्थितः । प्रणमामि ततः सर्व-रूपिणं बलिरूपिणम् ॥ इति प्रणम्य दक्षिणकर्णं धृत्वा—(ॐ यज्ञार्थे पशवः सृष्टा यज्ञार्थे पशुघातनम् । अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः ॥) शृङ्गे पृष्ठे ललाटे च मेढ्रे च कर्णपादयोः । मुञ्चन्तु सर्वगात्राणि छागस्य पशुदेवताः । इति पठित्वा कर्णमत्यजन्नेव पशुगायत्रीं जपेत्—ॐ पशुपाशाय विद्महे शिरश्छेदाय धीमहि, तन्नश्छागः प्रचोदयात् ॥ इति । तत आचारात् ॐ ऐं ह्रीं श्रीं इति बीजैर्जलपुष्पाक्षतं बलिमूर्ध्नि क्षिपेत् । ततः कुशाक्षतजलान्यादाय—ॐ अद्येत्यादि अमुकगोत्रस्यामुकशर्मणोऽमुकदेवताप्रीतिकामः

(पूर्वाङ्गीकृतं) अमुं छागपशुं वह्निदैवतं श्री अमुकदेवतायै (अमुकदेवताप्रीतये वा) तुभ्यं घातयितुमहं समुत्सृज्ये । इति सङ्कल्प्य खड्गपूजां कुर्यात् । तद्यथा—ॐ खड्गाय नमः । इति खड्गं पाद्यादिभिः सम्पूज्य—ॐ असिविशसनः खड्गः तीक्ष्ण-धारो दुरासदः । श्रीगर्भो विजयश्चैव धर्मपाल नमोऽस्तु ते ॥ इति खड्गवन्दनं कृत्वा हस्ते गृहीत्वा छागस्कन्धोपरि वारत्रयं छिन्धीत्युच्चार्य्य सम्प्रदायानुसारेण परीक्षानन्तरं तं खड्गमन्यस्मिन् ब्राह्मणदक्षिणकरे दद्यात् । स च ब्राह्मणः खड्गं गृहीत्वा देवं प्रणम्य परीक्षितं छागं छिन्द्यात् । अथ देवपूजकः स्वयं तच्छिन्नं शिरः सत्वर-मुत्थाप्य गृहीत्वा देवमुखस्पर्शनं विधाय फलगन्धपुष्पधूपदीपसहितं तच्छिरो भक्त्या देवाय दद्यात् । ततो दक्षिणामुत्सृजेत्तथा हि—कुशादीन्यादाय ॐ अद्य कृतैतच्छाग-बलिदानकर्मप्रतिष्ठार्थमेतावद्द्रव्यमूल्यकहिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणामहं ददे ॥ ॐ स्वस्तीति प्रतिवचनम् ॥ इति छागबलिदानविधिः ।

इति मिथिलामहीमण्डलान्तर्गत 'तरौनी' ग्रामवासि-पं० अनन्तलालझाशर्मात्मज
पं० रामचन्द्रझा व्याकरणाचार्यसम्पादिता 'इन्दुमती' परिशिष्टसहिता
'दुर्गासप्तशती' समाप्ता ।

—○✻○—

राष्ट्रिय संस्कृत संस्थान
जयपुर परिसर, जयपुर
पुस्तकालय
क्रमांक 13392

नवीन प्रकाशित महत्त्वपूर्ण ग्रंथ

विवाहपद्धतिः । 'चन्द्रिका' हिन्दी व्याख्या सहित	६-००
सत्यनारायणव्रतकथा । 'हरिप्रिया' हिन्दीटीका सहित	५-००
दत्तात्रेयतंत्रम् । 'शिवदत्ती' हिन्दी टीका सहित	८-००
उड्डीशतंत्रम् । 'शिवदत्ती' हिन्दी टीका सहित	८-००
कालीरहस्यम् । 'शिवदत्ती' हिन्दी टीका सहित	२०-००
दुर्गापूजा-श्यामापूजापद्धतिः । (मैथिल साम्प्रदायिक)	५-००
शिवसंहितोक्त रामार्चापद्धतिः । संपादक-पं० गुलाब झा	२-००
श्रीहनुमच्छत्रुञ्जयस्तोत्रम् । सम्पादक-पं. रामजन्म मिश्र	२-००
रामचन्द्रस्तवराजस्तोत्रम् । हिन्दी टीका सहित	३-००
अर्धनारीश्वरस्तोत्रम । श्रीमच्छंकरभगवत्पादविरचितम्	३-००
कनकधारा-लक्ष्मीस्तवराजस्तोत्रम् । धनदा लक्ष्मीसिद्धि लक्ष्मीस्तोत्र श्रीसूक्तादि सहित । हि०टी०	२-००
संक्षिप्तशिव हनुमत्प्रतिष्ठापद्धतिः । पं० देवीप्रसाद मिश्र	५-००
दुर्गासप्तशती । (सचित्र) सर्वमंगला हिन्दी व्याख्या पूजाविधि सहित	१५-००
महालक्ष्मीपूजापद्धतिः । सर्वदेवपूजाविधान-पूजामीमांसा-सम्पुटित श्रीसूक्तादिविभूषित । हिन्दी टीका	५-००
गंगालहरी । सदाशिवभट्टकृत 'पीयूषलहरी' संस्कृत टीका सहित	३-००
दकारादिदुर्गासहस्रनामस्तोत्रम् । सम्पादक मधुसूदनप्रसाद मिश्र	२-००

...णदास अकादमी, पो.बा. १११८, वाराणसी-२२१००१

GB
294.
JHA/
JACL01
393